इन्द्र ज्येष्ठा मरुद्गणा देवासः पूषरातयः। विश्वे ममश्रुता हवम्॥५॥

अम्बितमे नदीतमे देवितमे सरस्वति।
अप्रशस्ता इवस्मसि प्रशस्तिमम्ब नस्कृधि ॥६ ॥
त्वे विश्वा सरस्वति श्रितायूँषि देव्याम्।
शुनहोत्रेषु मत्स्व प्रजां देवि दिदिड्ढिनः ॥
इमा ब्रह्म सरस्वति जुषस्व वाजिनीवति।
या ते मन्म गृत्समदा ऋतावरि प्रियान्देवेषु जुह्वति ॥८ ॥

प्रेतां यज्ञस्य शम्भुवां युवामिदा वृणीमहे।
अग्निं च हव्य वाहनम् ॥९ ॥

द्यावा नः पृथिवी इमं सिध्रमद्य दिवस्पृशम्।
यज्ञं देवेषु यच्छताम् ॥१० ॥
आ वामुपस्थमद्रुहा देवाः सीदन्तुयज्ञियाः। इहाद्य सोम पीतये ॥११ ॥

॥इत्यैन्द्रभद्रं शुभम् ॥

॥अथानो भद्रम् ॥

(निम्नदशऋचायें ऋग्वेद मण्डल १ से १९ की है)

आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरितास उद्भिदः।
देवा नो यथा सदमिद्वृधे असन्न प्रायुवो रक्षितारो दिवे दिवे ॥१ ॥
देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभिनो निवर्त्तताम्।
देवानां सख्यमुपसेदिमा वयं न आयुः प्रतिरन्तु जीवसे ॥२ ॥
तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्त्रिधम।
अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥३ ॥

तन्नो वातो मयोभुवातु भेषजं तन्माता पृथिवी तत्पिता द्यौः ।
तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतंधिष्ण्या युवम् ॥४ ॥
तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥५ ॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति न पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥६ ॥
पृषदश्वा मरुतः पृश्निमातरः शुभं षावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसा गमन्निह ॥७ ॥
भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवा सस्तनुभिर्व्यशेमहि देवहितं षदायुः ॥८ ॥
शतमिन्नु शरदो अन्तिदेवा षत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासोषत्र पितरो भवन्ति मा नो मद्धया रीरिषतायुर्गन्तोः ॥९ ॥
अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वेदेवा अदितिः पञ्चजना अदितिर्जातमदिति र्जनित्त्वम् ॥१० ॥

॥इत्यानो भद्रं शुभम् ॥

॥अथान्ते अशीति भद्रम् ॥

भद्रो नो अग्निः सुहवो विभावसु, र्भद्र इन्द्रः पुरूहुतः पुरुष्टुतुः ।
भद्रा सूर्य उरुचक्षा उरुण्यचा, भद्रश्चन्द्रमाः समिथेषु जागृविः ॥१ ॥
भद्रः प्रजा अजन्यन्नः प्रजापति, र्भद्रः सोमः पावमानो वृषा हरिः ।
भद्रस्त्वष्टा विदधद्रूपाण्यद्भुतो, भद्रो नो धाता वरिवस्यतु प्रजाः ॥२ ॥
भद्रस्तार्क्ष्यः सुप्रजस्त्वाय महा, नारिष्टनेमिः पृतना युधा जयन् ।
भद्रोवायुर्मातरिश्वा नियुत्पति, र्वेनो गयस्फान उशन्सदाऽस्तुनः ॥३ ॥

भद्रो मित्रो वरुणो रुद्र इद्वृधा, भद्रोऽहिर्बुध्न्यो भुवनस्य रक्षिता।
भद्रो नो वास्तोष्पतिरस्त्वमीवहा, भद्रा क्षेत्रस्य पतिर्विचर्षणिः ॥४॥
भद्रो विभुर्विश्वकर्मा बृहस्पति, र्भद्रो द्विषस्तपनो ब्रह्मणस्पतिः।
भद्रः सुपर्णो अरुणो मरुत्सखा, भद्रोनोवातो अभिवातु भेषजी ॥५॥
भद्रो दधिक्रा वृषभः कनिक्रदद्, भद्रः पर्जन्यो बहुधा विराजति।
भद्रः सरस्वां उत नः सरस्वती, भद्रो वशी भद्र इन्द्र पुरूरवः ॥६॥
भद्रोनः पूषः सविता यमो भगो, भद्रोऽग्रज एक पादर्यमा मनुः।
भद्रो विष्णुरुरुगायो वृषा हरि, र्भद्रो विवस्वां अभिवातु नस्तमना ॥७॥
भद्रा गायत्री कुकुभुष्णिहा विराड्, भद्रानुष्टुप् बृहती पंक्तिरस्तुनः।
भद्रा नस्त्रिष्टुब्जगती पुरु प्रिया, भद्रातिच्छन्दा बहुधा विभूवरी ॥८॥
भद्रानो राकानुमतिः कुहूः सहृद्, भद्रासिनिवाल्यादितिर्मही ध्रुवा।
भद्रानो द्यौरन्तरिक्षं मयस्करं, भद्रोश्वो दक्षस्तनयाय नस्तुजे ॥९॥
भद्रो नः प्राणः सुमनः सुवागसद्, भद्रो अपानः सतनोः सहात्मना।
भद्रं चक्षुर्भद्रमिच्छ्रोत्रमस्तुनो, भद्रं न आयुः शरदो असच्छताम् ॥१०॥
भद्रेन्द्राग्निनो भवंतामृतावृधा, भद्रानो मित्रावरुणा धृतव्रता।
भद्राश्विना नो भवतां नवेदसा, भद्राद्यावा पृथिवी विश्वम्भुवा ॥११॥
भद्रा न इन्द्रा वरुणा रिशादसा, भद्रा न इन्द्रा भवतां बृहस्पतिः।
भद्रेन्द्रा विष्णू सवनेषुयावृधा, भद्रेन्द्रा सोमा युधि दस्यु हन्तमा ॥१२॥
भद्राग्ना विष्णू विदधस्य प्रसाधना, भद्रानोऽग्नीन्द्रा वृषभा दिवस्पती।
भद्रानो अग्नीवरुणा प्रचेतसा, भद्राग्नीषोमा भवतां न वेदसा ॥१३॥
भद्रा सूर्याचन्द्रमसा कविक्रतू, भद्रा सोमा भवतां पूषणा नः।
भद्रेन्द्र वायु पृतना स्वसाहसी, भद्रा सूर्याग्नी अजिता धनञ्जया ॥१४॥
भद्रा नः सन्तु वसुवो वसु प्रजा, भद्रा रुद्रा वृत्रहणा पुरन्धरा।
भद्रा आदित्याः सुपसः सुनीतयो, भद्रा राजानो मरुतो विरप्सिनः ॥१५॥

भद्रा न ऊमा सुहवाः शतश्रियो, विश्वेदेवा मनवश्चर्षणी धृतः ।
भद्राः साध्या अभिभवः सूरचक्षसो, भद्रा नः सन्त्वृभवो रत्नधातमाः ॥१६ ॥
भद्रा सर्वे वाजिनो वाजसातयो, भद्रा ऋषयः पितरो गभस्तयः ।
भद्रा भृगवोऽङ्गिरसाः सुदानवो, भद्रागन्धर्वाप्सरस सुदंशसः ॥१७ ॥
भद्रा आपः शुचयो विश्वभृतमा, भद्राः शिवा यक्ष्मनुदो न ओषधीः ।
भद्रा गावः सुरभयो वयोवृधो, भद्रा योषा उषतीर्देव पत्नयः ॥१८ ॥
भद्राणि सामानि सदा भवन्तु नो, भद्रा अथर्वाण ऋचो यजूँषिनः ।
भद्रा नक्षत्राणि शिवानि विश्वः, भद्रा आशा अह्नुताः सन्तुनो हृदि ॥१९ ॥
संवत्सरा न ऋतवो मयो भवो, यो वा आयुवाः सुसराण्युतक्षपाः ।
मुहूर्त्ताः काष्टाः प्रदिशो दिशश्च सदा, भद्रासन्तु द्विपदेशंचतुष्पदे ॥२० ॥
भद्रं पश्येम प्रचरेम भद्रं, भद्रं वदेम श्रृणुयाम भद्रम् ।
तन्नो मित्रो वरुणोमा महन्ता, मदितिः सिन्धुः पृथिवी उतद्योः ॥२१ ॥

॥इत्यशीति भद्रं शुभम् ॥

(उपर्युक्त भद्र पाठ प्रायः सभी माङ्गलिक कृत्यों में कार्यारम्भ में उच्चारण किये जाते हैं । इन भद्र पाठों में से समय-सुविधानुसार एक, दो या सब सूक्तों का पाठ श्रोता, वाचक तथा यजमान के लिए परम मंगलमय होता है ॥)

॥अथकलशार्चनम्॥

ग्रह मण्डल के पूर्व दिग्भागमें जो अष्टदल लिखा जाता है, (१)उस पर सोने, चान्दी, तांबे अथवा मिट्टी के बने कलश को शुद्ध जल से भरकर स्थापित करें इस कलश के जल से यज्ञ की समाप्ति पर अभिषेक (छींटे) करने से धन-धान्य, आयु, नीरोगता तथा सारी कामनाओं की सिद्धि होती है ॥ तीन बार गायत्री का उच्चारण कर कलश स्थापित करें और निम्नमन्त्रों से कलश की और पुष्प फेंकें। यथाः

ॐ भूर्भुवः स्वः, तत्सवितुर्वरेण्यं, भर्गो देवस्य धीमहि धियो योनः प्रचोदयात्॥३॥

(२) अभिनो देवीर्वसा महः शर्मणा नृप पत्नीः। अच्छिन्नपत्राः सचन्ताम्॥१॥
इह इन्द्राणीमुपह्वये वरुणानीं स्वस्तये। अग्नायीं सोम पीतये॥२॥
महीद्यौः पृथिवी च न इमं यज्ञं मिमीक्षिताम्। पिपृतान्नो म भरीमभिः॥३॥
तयोरिद्घृत्वत्पयो विप्रारिहन्ति धीतिभः। गन्धर्वस्य ध्रुवे पदे॥४॥
स्योना पृथिवी भवानृक्षरा निवेशनी। यच्छा नः शर्म स प्रथः॥५॥
अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे। पृथिव्या सप्त धामभिः॥६॥
इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पांसुरे॥७॥
त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन्॥८॥
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पृशे। इन्द्रस्य युज्यः सखा॥९॥
तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्॥१०॥
तद्विप्रासो विपन्यवो जागृवासः समिन्धते। विष्णोर्यत्परमं पदम्॥११॥

---

(१) कुम्भं हेममयं कृत्वा रजतं ताम्रमेववा। निर्दोषं मृण्मयं वापि पूर्येन्निर्मलाम्भसा॥ एतेनामृतगर्भेण ब्रह्मणा वन्दितेनचा कलशेन समन्त्रेण यः कुर्यादभिषेचनम्। आयुरारोग्यमैश्वर्यं लभेत्कामान् सुशोभनान् ॥इतिग्रहशान्तौ॥ (२) ऋग्वेद मं० २, सू० २२, ऋषि-मेधा तिथि कण्वः॥

● पुनः कलश के दक्षिण दिग्भाग में रखे क्षेत्रपालों के पात्रों में निम्नमन्त्रों से अक्षत फेंकें :

[१]द्रष्टेनमः उपद्रष्टे नमः अनुद्रष्टेनमः, ख्यात्रेनमः उपख्यात्रेनमोऽनुख्यात्रेनमः,
शृण्वते नमः उपशृण्वते नमः, सते नमः असते नमः, जातायनमः जनिष्माणाय नमः,
भूताय नमः भविष्यते नमः, चक्षुषे नमः, श्रोत्राय नमः, मनसे नमः, वाचेनमः,
ब्रह्मणे नमः, शान्ताय नमः, तपसे नमः ॥१॥
भूतं, भव्यं भविष्यद् वषट् स्वाहा नमः, ऋक्सामयजुर्वषट् स्वाहा नमः,
गायत्री त्रिष्टुब्जगती वषट् स्वाहा नमः, पृथिव्यन्तरिक्षंद्यौर्वषट् स्वाहा नमः,
अन्नं कृषि वृष्टि र्वषट् स्वाहा नमः, पिता पुत्रः पोत्रो वषट् स्वाहा नमः,
प्राणो व्यानोऽपानो वषट् स्वाहा नमः, भूर्भुवः स्वर्वषट् स्वाहा नमः ॥२॥

● पुनः निम्नमन्त्रों से कलश पर पुष्प प्रक्षेपन करें :

[२]यो विश्वचक्षुरुत विश्वतोमुखो विश्वतो हस्त उत विश्वतस्पात्।
सम्बाहुभ्यां नमते सम्पतत्रैर्द्यावा पृथ्वी जनयन्देव एकः ॥१॥
ॐ [३]आब्रह्मन्ब्रह्मणो ब्रह्मवर्चस्वी जायता, मस्मिन्राष्ट्रे राजन्य एषव्यः
शूरोमहारथो जायतां, दोग्ध्री धेनुर्वोढानुड्वानाशुः सप्तिर्जिष्णुरथेष्टाः,
पुरन्ध्रिर्योषा सभेयो युवास्य यजमानस्य वीरो जायतां, निकामे निकामे
नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पचयन्तां योग क्षेमो नः कल्पताम् ॥२॥

इषेत्वोर्जेत्वा वायवः स्थोपायवः स्थदेवोवः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे आप्यायध्वमध्रया देवभागं प्रजावतीरनमीवा अयक्ष्मा वः स्तेन ईशत्तमाघशंसः परि वो रुद्रस्य हेतिर्वृणक्तु ध्रुवा अस्मिन् गोप्तौ स्यात् बह्वीर्यजमानस्य पशून् यजमानस्य पशुपा असि ॥१॥

देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे गोषदसि प्रत्युष्टं रक्षः प्रत्युष्टारातिः प्रेयमगाद्धिषणा बर्हिरच्छ मनुनाकृता स्वध्या वितष्टा उर्वन्तरिक्षं वीहीन्द्रस्य परिपूतमसि माधोमोपरि परुस्त ऋद्ध्या समाच्छेता तेमा रिषत् देववर्हिः शतवल्शां विवयं रुहम आदित्या

((१) लौ० ग्र० कां० ३७ सूक्त ४) (२) ऋग्वेद मण्डल १० सूक्त ८२ मं० ३ ॥ यजुर्वेद अध्याय २२ मंत्र २२

रास्नासीन्द्राण्याः सन्नहनं पूषाते ग्रन्थिं ग्रन्थातु स ते मास्था दिन्द्रस्यत्वा बाहुभ्यामुद्यच्छे बृहस्पते-स्त्वामूर्ध्ना हरामि देवङ्गमसितदा हरन्ति कवयः पुरस्ताद् देवेभ्यो जुष्टिमह बर्हिरासदे ॥२ ॥ (लौगाक्षी गृह्य० कां० ९ सूक्त ४)

वसोः पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्त्रधारमयक्ष्मा वा प्रजया संसृजामि रायस्पोषेण बहुला भवन्तिः ॥ मधुमद्घृतवत्पिवतन् वमाना जीवा जीवन्ति रुपवः सदेम मातरिश्वानो धर्मोऽसि द्यौरसि पृथिव्यसि विश्वधायाः परेण धाम्ना हुतासि माह्वाः सा विश्वायुः स विश्व-व्यचाः सा विश्वधायाः हुतस्तोको हुतो द्रप्सोऽग्रये बृहते नाकाय स्वाहा, दृयावा पृथिवीभ्यां सम्पृच्यध्वमृतावरि अर्णिमा मधुमत्तमामान्द्रा धानस्य सातयः, इन्द्रस्त्वा भगं सोमेना तनच्म्यदस्वमसि विष्णवे विष्णो हव्यं रक्ष स्वापो जागृत ॥ (लौ० गृ० कां ९ सूक्त ४)

महितृणामवोऽस्तु द्युम्नं मित्रस्यार्यम्णः दुराधर्षं वरुणस्य ॥१ ॥
नहि तेषाममाचन नाध्वसु वारणेषु इष रिपुरघशंसः ॥२ ॥
यस्मै पुत्रासो अदितेः प्रजीवस्य मर्त्याय ज्योतिर्यच्छन्त्यजस्त्रम् ॥३ ॥

(ऋग्वेद २०/१८५ मं० १ तः ३)

सोमानं स्वरणं कृणुहि ब्रह्मणस्पतिः कक्षीवन्तं च औशिजः ॥१ ॥
यो रैवान्यो अमीवहः वसुवित् पुष्टिवर्धनः सनः सिषक्तु यस्तुरः ॥२ ॥
मा नः शंसो अररुषो धूर्तिः प्राणङ्मर्त्यस्य रक्षाणो ब्रह्मणस्पते ॥३ ॥

(ऋग्वेद मण्डल १ सूक्त १८ मंत्र १-३)

- निम्नोक्त मन्त्रोंसे, प्रणीत पात्र में शुद्ध जल लेकर, उसमें तीन पुष्प डालकर अभिमन्त्रित करें । [१]अन्तर्गर्भ रहित दर्भा के बालिशतभरलम्बे दो दल पवित्र जल से पूर्ण प्रणीत पात्र में डालें :

संव्वः सृजामि हृदयं संसृष्टं मनोऽस्तुवः । सं सृष्टास्तन्वः सन्तु वः,
सं सृष्टः प्राणोऽस्तु वः ॥१ ॥

(छान्दोग परिशिष्टे)

(१) अन्तर्गर्तर्भिणं साग्रं कौशं द्विदलमेव च प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्र चित् ॥

सं व्याव: प्रियास्तन्व: सं प्रिया हृदयानि व:।
आत्मा वोऽस्तु सं प्रिय: सं प्रियास्तनवो मम ॥२ ॥

- निम्न मन्त्रों से कुशपवित्र द्वारा कलश पर जल छिड़क कर उसकी प्राण प्रतिष्ठा करें :

अग्नेरायुरसि तस्य ते मनुष्या आयुष्कृतस्तेनास्मा अमुष्मा आयुर्धे हि ॥१ ॥
इन्द्रस्य प्राण: स ते प्राणं ददातु यस्य प्राणस्तस्मै ते स्वाहा ॥२ ॥
पितृणां प्राणास्ते प्राणन्ददतु येषां प्राणस्तेभ्यो व: स्वाहा ॥३ ॥
मरुतां प्राणास्ते प्राणन्ददतु येषां प्राणास्तेभ्यो व: स्वाहा ॥४ ॥
विश्वेषां देवानां प्राणास्ते प्राणंददतु येषां प्राणास्तेभ्यो व: स्वाहा ॥५ ॥
प्रजापते: परमेष्ठिन: प्राणस्तौ ते प्राणन्दत्तां ययो: प्राणस्ताभ्यां वां स्वाहा ॥६ ॥
यदऽसर्पस्तत्सर्पिरभवो यन्नवमैस्तन्नवनीतमभवो यदध्रियथास्तद्धृतमभव: ॥७ ॥
घृतस्यधाराऽमृतस्य पन्था मिन्द्रेण दत्तं प्रयतं मरुद्भि:

तत्त्वा विष्णुरन्वपश्यत्तत्तेळ गव्यैरयत् ॥८ ॥
पावमानेनत्वा स्तोमेन गायत्र्या वर्तन्या पाँशोर्वीर्येणोद्धराम्यसौ ॥९ ॥
बृहतात्वा रथन्तरेण त्रिष्टुभा वर्तन्या शुक्रस्य वीर्येणोत्सृजाम्यसौ ॥१० ॥
अग्रेस्त्वा मात्रया जगत्या वर्तन्या देवस्त्वा सवितोर्नयतु जीवातवे जीवनस्यायासौ ॥११ ॥
देवा आयुष्मन्तस्तेऽस्तेऽमृतेनाऽयुष्मन्तस्तेषामयमायुषाऽयुष्मन्तस्त्वसौ ॥१२ ॥
ब्रह्मायुष्मा त्तद् ब्राह्मणैरायुष्मत्तस्यामयमायुषाऽयुष्मा नस्त्वसौ ॥१३ ॥
अग्निरायुष्मान्स वनस्पतिभिरायुष्माँस्तस्यामयमायुषाऽयुष्मानस्त्वसौ ॥१४ ॥
यज्ञ आयुष्मान्सदक्षिणा भिरायुष्माँस्तस्यामयमायुषाऽयुष्मानस्त्वसौ ॥१५ ॥
सोम आयुष्मान्सओषधिभिरायुष्माँस्तस्यामयमायुषाऽयुष्मानस्त्वसौ ॥१७ ॥
इमम् अग्ने आयुषे वर्चसे कृधि तिग्ममोजो सं शिशाधि।
माते वाऽस्मा अदिते शर्मयच्छ विश्वेदेवाजरदष्टिर्यथाऽसत् ॥१८ ॥

अश्विनोः प्राणस्तौ ते प्राणं दत्तां तेन जीव, मित्रावरुणयोः प्राणस्तौते प्राणन्दत्तां तेन जीव,
बृहस्पते प्राणः स ते प्राणं दत्तां तेन जीव ॥१९॥

- अब निम्न मन्त्रों से मण्डप की प्रत्येक दिशा में दिग्बन्धनार्थ तिल एवं अर्घक्षेपन करें :

आदौ पूर्वे :

ये देवाः पुरः सदोऽग्नि नेत्रा रक्षोहणस्ते नः पान्तु तेनोऽवन्तु तेभ्यः स्वाहा ॥१॥

दक्षिणेः

ये देवाः दक्षिणात् सदो यमनेत्रा रक्षोहणस्तेनः पान्तु तेनोऽवन्तु तेभ्यः स्वाहा ॥२॥

पश्चिमे :

ये देवाः पश्चात्सदो मरु नेत्रा रक्षोहणस्ते नः पान्तु तेनोऽवन्तु तेभ्यः स्वाहा ॥३॥

उत्तरे :

ये देवाः उत्तरात्सदो मित्रा वरुणनेत्रा रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यः स्वाहा ॥४॥

आकाशे :

ये देवाः उपरिषदः सोमनेत्रा अवस्वदन्तो रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यः स्वाहा ॥५॥

अग्निकोणे :

इदमहं रक्षोभिः समूहोम्यग्ने सन्दह रक्षासन्दग्धं रक्षोग्नये पुरः सदेरक्षोघ्ने स्वाहा ॥६॥

नैर्ऋतिकोणेः वायवे

यमाय दक्षिणात्सदे रक्षोघ्ने स्वाहा ॥७॥ मरुद्भ्यः पश्चात्सद्भ्यो रक्षोभ्यः स्वाहा ॥८॥

ईशानेः

मित्रावरुणाभ्याम् उत्तरात्सद्भ्यां रक्षोभ्यां स्वाहा ॥९॥
अधः सामायोपरिषदे वस्वदत्ते रक्षोघ्ने स्वाहा ॥१०॥

● निम्न तीन मन्त्रों से दर्भ पवित्र द्वारा द्रव्य शोधनार्थ प्रणीत पात्रस्थ जल को अभिमंत्रित करें :

आपो हिष्ठा मयो भुवस्तान उर्जेदधातन। महेरणाय चक्षसे ॥१ ॥
यो वः शिव तमो रसस्तस्य भाजयते हनः। उशतीरिव मातरः ॥२ ॥
तस्मा अरङ्गमामिवोयस्य क्षयाय जिन्वथ। आपोजनयथाच नः ॥३ ॥

● इस अभिमंत्रित जलसेनिम्न मन्त्रों द्वारा क्रमपूर्वक दर्भ पवित्रसे यज्ञीय उपकरणों का प्रोक्षण करें। देव अथवा पितरों के लिए दिये जाने वाले पदार्थ बिना प्रोक्षण के उपयोग में नहीं लाने चाहिऐं। जो वस्तुऐं धोने योग्य हों उन्हें देवार्थ तीन बार, मनुष्यार्थ दो बार और पितृ कार्य के लिए एक बार धोकर प्रयोग में लाना चाहिए। प्रोक्षण क्रिया विशेषतः उत्तान हाथ में पवित्र धारण कर के करनी चाहिए ॥

॥आदौ प्रोक्षणमर्घस्य ॥

आप्यायस्व समेतुते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य सङ्गथे ॥१ ॥

॥पुष्पाणिः ॥

पुष्पवती प्रसुमतिः फलिनीर फला उत। अश्वा इव सजितवरीर्वारुधः पारयिष्णवः ॥२ ॥

॥गन्धम् ॥

गन्धद्वारं दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरी सर्वभूतानां तामिहोपह्वयेश्रियम् ॥३ ॥

॥दर्भा प्रोक्षणम् ॥

कर्मणे वां वनस्पत्यमसि प्रत्युष्टं रक्षः प्रत्युष्टारातिः उर्वन्तरिक्षं वीहि ॥४ ॥

॥धूपम् ॥

धूरसि धूर्व धूर्वन्तं योऽस्मान्धूर्वति तं धूर्वय वयं धूर्वामस्तं च धूर्व।
देवानामसि वह्नितमं सव्रितमं पप्रितमं जुष्टतमं देवहूतमम् ॥५ ॥

यद्दीयते च देवेभ्यो गन्ध पुष्पादिकं तथा। अर्घपात्रस्थितैस्तोयेरभिपिच्य समुन्सृजेत ॥
यत्रक्षालनयोग्यं तन्त्रिः प्रक्षालनीयं त्रिभिर्देवेभ्यः क्षाल्येत् द्विर्मानुष्येभ्यः सकृत्पितृभ्यः ॥
उत्तानेन हस्तेन प्रोक्षणं समुदाहतम् ॥ वा० पु० ॥ गोभिलगृह्ये ॥कलिका पुराण ॥

विष्णोः क्रमोऽसि अह्रुतमसि हविर्धानं दृंहस्व माह्वान्मित्रस्य त्वा चक्षुषा
प्रेक्ष उरुत्वा वाताया वसवस्त्वा धूपयन्तु गायत्रेण छन्दसाङ्गिरस्वत्, रुद्रास्त्वा धूपयन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वत्,
आदित्यास्त्वा धूपयन्तु जागतेन छन्दसाङ्गिरस्वत्, विश्वेत्वादेवा वैश्वानरा धूपयन्त्वानुष्टुभेन
छन्दसाङ्गिरस्वत्, इन्द्रस्त्वा धूपयतु वरुणस्त्वा धूपयतु, रुद्रस्त्वा धूपयतु, विष्णुस्त्वा धूपयतु ॥५ ॥ ॥सूर्य की ओर जलक्षेपन ॥
उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम्। देवं देवत्रा सूर्यमग्नं ज्योतिरुत्तमम् ॥६ ॥

॥दीप की ओर ॥

तेजोऽसि शुक्रमसि ज्योतिरसि धामासि प्रियन्देवानामनाधृष्टं देवयजनं
देवताभ्यस्त्वा देवताभ्यो गृहणमि यज्ञेभ्यस्त्वा यज्ञेभ्यो गृहणमि ॥७ ॥

॥स्वललाटे तिलकम् ॥ आचार्य अपने माथे पर तिलक लगावे ॥

अध्वर्योऽयं यज्ञो अस्तु देवाः ओषधीभ्यः पशुभ्यो मे धनाय विश्वस्मै
भूताय ध्रुवो अस्तु देवाः स पिन्वस्व घृतवद् देव यज्ञः ॥८ ॥

॥आचार्य मस्तक पर अक्षत एवं पुष्प धारण करे ॥

इहैवैधि मापच्योष्टा पर्वता इवा विचाचलित्। इन्द्र इवेह ध्रुवस्तिष्टेह यज्ञ मुदाराय ॥९ ॥

॥आसन के रूप में पृथिवी को दोदर्भायें समर्पित करे ॥

ध्रवोद्यौं र्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे। ध्रुव विश्वमिदं जगद् ध्रुवो राजा विश्वामसि ॥

॥पृथिवी को गन्ध पुष्प भेंट करें ॥

मही द्यौ पृथिवी च न इमे यज्ञं मिमीक्षिताम्। पिपृतां नो भरीमभिः ॥

॥आकाश की ओर गन्ध पुष्प फैंके ॥

बळिथा पर्वतानां क्षेत्रं विभर्षि पृथिवि। प्रया भूमिं प्रवत्वति मह्ना जिनोषि महिनि ॥

- ग्रहमण्डल के पश्चिम दिग्भाग में लिखित द्वार प्रवेश के पाञ्च कोष्ठों में निम्नलिखित मन्त्रों से द्वार देवताओं को गन्धार्घ पुष्प समर्पित करें :

॥वायुकोणमें महागणपति को ॥

निषुसीद गणपते गणेषु त्वामाहू र्विप्रतमं कवीनाम्।
न ऋते त्वत्क्रियते किञ्चनारे महामर्कमर्घवञ्चित्रमर्च ॥

॥नैर्ऋत कोण में कुमार को ॥

कुमारं माता युवतिः समुब्दं गुहाविभर्ति न ददाति पित्रे।
अनीकमस्य न मिमिज्जनासः पुरा पश्यन्ति निहित मारुतौ ॥

॥ईषान कोणमें श्रीः को ॥

अश्वपूर्वां रथमध्यां हस्तिनाद प्रमोदिनीम्।
श्रियं देवीं उपह्वये श्रीर्मां देवी ' जुषताम्॥

॥मध्यकोष्ठ में सरस्वती को ॥

इयं सुष्मेभिर्विसख्वा इवा रुजत्सानु गिरीणां तविषेभिरुर्मिभिः।
पारावतघ्नीमवसे सुवृक्तिभिः सरस्वती मा विवासेम धीतिभिः ॥

॥मध्यकोष्ठ में ही लक्ष्मी को ॥

कास्यस्मितां हिरण्य प्राकारां आऽर्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम्॥

॥अग्निकोण में विश्वकर्मा को ॥

विश्वकर्मा विश्वदेवो विश्वजिद् विश्वदर्शितः ।
ते त्वा घृतस्य धारया श्रेष्ठ्याय समभूषत ॥

॥पूर्व में अष्टदलयुक्त कलश का ॥

ब्रह्मदेवानां पदवीः कवीनां ऋषिर्विप्राणां महिषो मृगाणाम् ।
श्येनोग्रध्राणां स्वदितिर्वनानां सोमः पवित्रमत्येति रेभन् ॥१ ॥
प्रतद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठः ।
यस्योरुषु त्रिषु विक्रमणेष्वऽधिक्षियन्ति भुवनानि विश्वा ॥२ ॥
यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो वनस्पतिषु ।
यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमोऽस्तुदेवाः ॥३ ॥
अग्निमीळ पुरोहितं यज्ञस्देवमृत्विजम् । होतारं रत्न धातमम् ॥४ ॥
इषे त्वोर्जेत्वा वायवः स्थोपवायवः स्थ देवो वः ।
सविता प्रार्पयतु श्रेष्ठ तमाय कर्मणे ॥५ ॥
अग्न आयाहि वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि ॥६ ॥
शन्नो देवीरभीष्टये आपो भवन्तु पीतये शंय्यो रभिस्रवन्तु नः ॥७ ॥
अहं पितृन सु विदत्रां अवित्सि न पातं च विक्रमणं च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहा गमिष्ठाः ॥८ ॥
वषट् ते विष्णवास आकृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वधन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥९ ॥

॥स्वेष्टदेव प्रधानानि ॥

- इस स्थल पर यज्ञके प्रधान देवताओं का मन में ध्यान करके उनके अपने-अपने मन्त्र से कलश पर पुष्प चढ़ाये जायें । विवाह संस्कार में अग्नि, पुष्टिपति, प्रजापति आदिस्वेष्ट-देव हैं ॥ **अग्निर्ना रयिमश्न वत्वोषमिव दिवेदिवे । यशसं वीर वत्तमं नमः ॥१ ॥**

प्रजापते नहि त्वदन्य एता विश्वां जातानि परिता बभूव।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पत्यो रयीणाम् ॥२॥
ये के च ज्मा महिनो अहिमाया दिवो जज्ञिरे अपां सधस्थे।
ते अस्मभ्यमिषये विश्वमायुः क्षपा उस्त्रा वरिवस्यन्तु देवा नमः ॥३॥
अग्नये नमः, वायवे नमः, सूर्याय नमः, चन्द्रमसे नमः, विष्णवे

प्रायश्चितयाग देवताभ्यो नमः ॥

- ग्रहमण्डल में अङ्कित दश दिक्पालों के कोष्ठकों में एक-एक तथा ग्रहों के कोष्ठकों में दो-दो अखरोट रखकर, गन्ध पुष्पादि से दिक्पालों व ग्रहों की स्थापना निम्नोक्तमन्त्रों से क्रमपूर्वक करें : ॥पूर्व में वज्रचिह्नयुक्त इन्द्र की ॥

इन्द्रा पर्वता बृहता रथेन वामीरिष आवहतं सुवीराः।
वीतं हव्यान्यध्वरेषु देवा वर्धेथां गीर्मिरिळयामदन्ताम् ॥१॥

॥अग्निकोण-शक्ति चिह्नयुक्त अग्निदेव की ॥

अग्नि सप्ति भाजम्भरं ददात्यग्निर्वीरं श्रुत्य कर्म निष्ठम्।
अग्नि रोदसि विचरत् समञ्जन् नग्निर्नारीं वीर कुक्षिं पुरन्धिम् ॥२॥

॥दक्षिणमें- दण्डाकारयमकी ॥

यमो दधार पृथिवीं यमो द्यामुत सूर्यम्। यमाय सर्व मित्तस्थे यत्प्राणाद्वायुरक्षिताम् ॥

॥नैर्ऋत कोणमें-खड्गाकारनैर्ऋति की ॥

यं ते देवी नैर्ऋति रावबन्धपाशं ग्रीवा स्वविचर्त्यम्।
तन्ते विषयाभ्यायुषो नु मध्येथा विषितः पित्तमऽधि प्रमुक्तः ॥४॥

॥पश्चिममें- पाशाकार वरुण की ॥

उदुत्तमं वरुण पाशमऽस्मदऽवाधमं विमध्यं श्रथाय।
अथा वयमादित्य व्रते तवानागासो अदितये स्याम्॥

॥वायुकोण में-ध्वजाकार वायु की ॥

वायवा याहि दर्शतेमे सोमा अरंकृता। तेषां पाहि श्रुधी हवम्॥

॥उत्तर में-गदाकार कुबेर की ॥

सोमो धेनुं सोमो अर्वन्तमाशुं सोमो वीरं कर्मण्यं ददाति।
साधन्यं वितथ्यं सभेयं पितृश्रवणं यो ददाश तस्मै
राजाधिराजाय प्रसह्यसाधने नमो वयं वैश्रवणाय कुर्म हे।
स मे कामान् कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु,
कुबेराय वैश्रवणाय महाराजाय वै नमो नमः॥

॥ईशान कोण-त्रिशूलाकार रुद्र की ॥

ईशानं त्वा शुश्रुमा वयं धनानां धनपते गोमदग्ने
अश्व वद् भूरिपुष्टं हिरण्यवदन् नवद्धे हि मह्यम्।
दुहान्ते द्यौः पृथिवी पयो जगरस्त्वा सोद को विसर्पतु,
प्रजापति नात्मनमाप्रीणे रिक्तो म आत्मा॥
यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो वनस्पतिषु।
यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नोऽस्तु देवाः॥

॥ऊपर की ओर-पद्माकार ब्रह्म की ॥

ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः।
सुबुध्न्या उपमा अस्य विष्ठाः सतश्च यानिमसतश्च विवः॥

॥नीचे-चक्राकार विष्णु की ॥

वषट् ते विष्णवा स आकृणोनि तन्मे जुषस्व शिपिविष्ट हव्यम्।
वर्धन्तु त्वा सुष्टतयो गिरो मे यूयं पातु स्वस्तिभिः सदा नः ॥

॥कलश के चार कोणों में नागदेवताओं की—यथा ईशाने ॥

नमो अस्तु सर्पेभ्यो ये के च पृथिवियामधि।
ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥

॥अग्निकोणे ॥

येषु वा यातुधाना ये वा वनस्पतीरनु
येऽवटेषु शेरते तेभ्यः सर्पेभ्यो नमः ॥

॥नैर्ऋति कोणे ॥

ये वाऽधो रोचने दिवोये वा सूर्यस्य रश्मिषु।
येऽप्सु सदांसि चक्रिरे तेभ्यः सर्पेभ्यो नमः ॥

॥वायु कोणे ॥

धन्वनागा धन्वनाजिं जयेम धन्वा तीव्राः समदो जयेम।
धनुः शत्रोरपकामं कृणोति धंबना सर्वाः प्रदिशो जयेम ॥

- ग्रहमण्डल के भीतरी चतुष्कोण में बने नौ कोष्ठकों में नौ ग्रहों की—यथा

॥मध्ये चक्राकार साग्निसूर्य की ॥१ ॥

अग्निस्तु विश्रवस्तंतु वि ब्रह्माणमुत्तमम्। अतूर्तं श्रावयत्पतिं पुत्रं ददातु दाशुषे ॥
आकृष्णेन रजसा वर्त्तमान निवेशयन्नमृतं मर्तयं च।
हिरण्येन सविता रथेन देवो याति भुवनानि पश्यन् ॥

॥अग्निकोण में वरुण देवता सहित चक्राकार चन्द्रमा की ॥२ ॥

एवा वन्दस्व वरुणं वृहन्तं नमस्या धीरममृतस्य गोपाम्।
स नः शर्म त्रिवरुथं वियं सत्पातं नोद्यावा पृथिवी उपस्थे॥
या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु।
तेभिर्नो विश्वैः सुमना अहेळन् राजन सोम प्रतिहव्या गृभाय॥

॥दक्षिण में सकुमार चतुष्कोणाकार भौम की ॥३ ॥

तं युवां देवावश्विनौ कुमारं सहदेव्यं दीर्घायुषं कृणोतन।
अग्निमूर्धा दिवः ककुत्पतिः पृथिव्या अयम्। रेतां जिन्वति॥

॥ईशाने सविष्णु देवता त्रिकोणाकार बुध की ॥४ ॥

वषट्ते विष्ण आस आकृणोमि तन्मे जुषस्व शिपिविष्टहव्यम्।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पातु स्वस्तिभिः सदानः॥
मघवन वाचमेमां यान्ते वसिष्ठो अर्चति प्रशस्तिम्।
इमा ब्रह्मसाधमादे जुषस्व॥

॥उत्तर में सेन्द्र त्रिकोणाकार बृहस्पति की ॥५ ॥

त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम्।
ह्वयामि शक्रं पुरुहुतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः॥
बृहस्पते अति यदर्यो अर्हद् द्युमद्विभाति क्रतु मज्जनेषु।
यद्दीद्यच्छ वसर्त प्रजात तदस्मासु द्रविणं देहि चित्रम्॥

॥पूर्व में सरस्वती सहित चतुष्कोणाकार शुक्र की ॥६ ॥

सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने।
सरस्वतीं सुकृतो आह्वयन्ते सरस्वती दाशुषे वर्यंधात्॥
अन्नात् परिस्त्रतो रसं ब्रह्मणा व्यपिवत्क्षत्रम्।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस्य इन्द्रस्येन्द्रियमिदं पयोऽमृतम्॥

॥पश्चिमे प्रजापति देवता सहित जालाकार शनि की ॥७ ॥

प्रजापति नहि त्वदन्य एता विश्वाजातानि परिता बभूव।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्॥
शन्नो देवी रभीष्टये आपो भवन्तु पीतये। शँय्यो रभिस्त्रवन्तुनः॥

॥नैर्ऋति कोण में गणपति सहित यवाकार राहु की ॥८ ॥

गणानां त्वा गणपतिं हवामहे कविं कवीनामुंपमश्रवस्तमम्।
ज्येष्ठराजं ब्रह्माणं ब्रह्मणस्पत आ नः श्रृण्वन्नूतिभिः सीदसादनम्॥
कयानश्चित्र आभुव दूती सदा वृधः सखा कया सचिष्ठया वृत॥

॥वायुकोणे रुद्रदेव सहित पताकाकार केतु की ॥९ ॥

आवो राजानमध्वरस्य रुद्धं होतारं देव यजं रोदस्योः।
अग्नि पुरातन यित्नूरचिताद्धिरण्य रुपमवसे कृण्वध्वम्॥
केतुं कृण्वन्नकेतवे पशो मर्या अपेशसे समुशद्भिरजायथाः॥

॥ग्रहमण्डलोत्तर दिशा में ब्रह्मदेवतायुत पक्षयाकार ध्रुव की ॥१० ॥

कोऽद्य युक्ते धूरिगा ऋतस्य शिमि, वतो भामिनो दुर्हृनायून्।
आसन्निषून् हृत्स्वसो मयोभून्य ऐषां भृत्या मृणवत्सजीवात्॥
ध्रवौर्द्यौ र्ध्रुवा पृथिवी र्ध्रुवा सः पवता इमे।
ध्रुवं विश्वमिदं जगद् ध्रुवो राजाविशामयम्॥

॥दक्षिण दिशा में अनन्त देवता सहित कुम्भाकार अगस्त्य की ॥११ ॥

आदित्यं गर्भां पयसा समज्जन सहस्त्रस्य प्रतिमां विश्वरुपम्।
परिवृङ्धि हरसामाभि संस्थाः शतयुषं कृणुहि चीयमानः॥

अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छुमानः ॥
उभौ वर्णा वृषिरुग्रः पुपोष सत्य देवेष्वाशिषो जगाम ॥

॥कलश में वास्तोष्पति देवताओं की ॥१२ ॥

अमीवहा वास्तोष्पते विश्वारुपाणया विषत्। सख्वा सुशेवए धिनः ॥
वास्तोष्पते प्रतिजानी ह्यस्मान्वावेशो अनमीवो भवा नः।
यत्त्वेमहि प्रतिन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे ॥
वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो।
अजरा सस्ते सख्ये स्याम पितेव पुत्रान् प्रति नो जुपस्व ॥
वास्तोष्पते शग्मया शं सदाते सक्षीम हिरण्वयागातुमत्या।
पाहि क्षेम उत योगे वरं नो यूयं पातु स्वस्तिभिः सदा नः॥

॥क्षेत्रपालों की ॥१३ ॥

क्षेत्रस्यपतिना वयं हितेनेव जयामसि। गामश्वं पोषयित्वा सनो मृळातिदृशे ॥
क्षेत्रस्यपते मधुमन्त भूर्मिन्धेनुरिव पयो अस्मासु धुक्ष्व।
मधुश्च्युतं घृतमिव सुपूतममृतस्य नः पतयो मृळयन्तु ॥
मधुमतीरोषधीर्द्यावा आपो मधुमान्नो भवन्त्वन्तरिक्षम्।
क्षेत्रस्य पतिर्मधुमान्नो अस्त्वरिष्यन्तो अन्वेनं चरेम ॥

॥कलश में सर्वदेवस्थापनम् ॥१४ ॥

भूतो भूतेषु चरति प्रविष्टः स भूतानामधिपतिर्बभूव।
तस्य मृत्युश्चरति राजसूयं स राजा राज्यमनमन्यतामिदम् ॥
उर्वी रोधसी वरिवः कृणोतु क्षेत्रस्य पत्नीरधिवोच तं नः।
तन्मे द्यावा पृथिवी नाथितो जोहवीमि ते नो मुञ्च तमं हंसः।

यो हवै देवान्साध्यान् वेद सिद्ध्यत्यस्मादेमिवाव लोकाः ॥
देवाः साध्याः सिद्धं ह्यस्यै सिद्धमस्मै सिद्ध
ममुष्यै य एवं वेद सिद्ध्यत्यस्मै ॥
यो विश्व चक्षुरुत विश्वतोमुखो विश्वतो हस्तउत विश्वतस्पात् ।
सम्बा हुभ्यां नमते संयजत्रै र्द्यावा पृथिवी जनयन्देव एकः ॥
यस्य व्रतमुपतिष्ठन्त आपो यस्य व्रते पश्वो सन्ति सर्वे ।
यस्य व्रते पुष्टिपतिर्निविष्ट तं सरस्वन्तमवसे जोहवीमि ॥
गौरिर्मिमाय सलिलानि तक्ष त्येक पदी द्विपदी साचतुष्पदी ।
अष्टपदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥
दिव्यं सुपर्णं वायसं वृहन्तम् अपां गर्भ दर्श तमोषधीनाम् ।
अभिपतो वृष्टिभिस्तर्पयन्तं सरस्वन्तमवसे जोहवीमि ॥
सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने ।
सरस्वतीं सुकृतो आह्वयन्ते सरस्वती दाशुषे वर्यं धात् ॥
सरस्वत्यमभिनो नेषिवस्यो मापस्फरी पयसः मान आधक् ।
जुषस्वनः संख्या वेश्या च मा त्वत्क्षेत्राण्यरणानि गन्म ॥
पावका नः सरस्वती वाजिभि र्वाजिनीवती यज्ञं वष्टुधिया वसुः ।
चोदयत्री सूनृतानां चेतन्ती सुमतीनां यज्ञं वधे सरस्वती ॥
जातवेदस्य सुनवास सोम मरातियतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥
त्र्यम्बकं यजामहे सुगन्धिं रायिपोषणम् ।
उरुवारुकमिव बन्धनान् मृत्योर्मुक्षीय मामृतात् ॥
यतो इन्द्र भयावहे ततो नो अभयंकृधि ।
मघवञ्छग्धि तव तन्व ऊतभिर्विद्विषो विमृधो जहि ॥
ये देवा दिव्यैकादशस्थ पृथिव्यामध्यैकादशस्थ ।
अप्सुषदोमहिनैका दशस्थ ते देवासो यज्ञमिमं जुषध्वम् ॥

ससष्टुभा स ऋक्वता गणेन बलं रुरोज बलिगं रवेण।

बृहस्पतिरुस्त्रिया हव्यसूदः कनिक्रद द्धावशती रुदाजत्॥

एवा पित्रे विश्वेदेवाय वृष्णे यज्ञैर्विधेम मनसा हविर्भिः।

बृहस्पते सुप्रजा वीरयन्तो वयं स्याम पतयो रयीणाम्॥

ये के च ज्मा माहिनो अहिमाया दिवो जज्ञिरे अपां सधस्थे।

ते अस्मभ्यमिषये विश्वमायुः क्षप उस्त्रा वरिवस्यन्तुदेवाः॥

रक्षोहणं वाजिनमाजि घर्मि मित्रं प्रथिष्टमुपयामि शर्म।

शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा सरिषा पातुनक्तम्

प्रत्यग्ने हरसा हरः श्रृणीहि विश्वतः प्रति।

यातुधानस्य रक्षसो बलं वीरुज वीर्यम्॥

अन्विदनुमते त्वमन्यासै शं च नस्कृधि।

इषं तो कायनो दधत्प्राण आयूंषि तारिषः॥

यत्ते नाम सुहवं सुप्रणीतेऽनुमतेऽनुमतं सदानु।

तेन त्वं सुमतिर्देव्यस्मै इषं पिन्व विश्ववारां सुवीराम्॥

राकामहं सुहवां सुष्टुतीं हवे श्रृणोतु नः सभगा बोधतुत्मना।
सवीत्वपः सूच्याऽच्छिद्य मानया दधातु वींर शतदायमुक्थम्॥
यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि।
ताभिर्नो अद्य सुमना उपागहि सहस्त्रपोषं सुभगे रराणा॥
सिनीवालि पृथुष्टुके या देवानामसिस्वसा। जुषस्व हव्यमाहुतं प्रजान्देविदिदिळनः॥
याः सुब्राहुः स्वङ्गुरिः सुषूमा बहुसूवरि। तस्यै विश्वपत्नयै हविः सिनीवाल्यै जुहोतनः॥
या कुह्वर्या सिनीवाली या राकायासरस्वती। इन्द्राणीमह्वऊतये वरुणानीं स्वस्तये॥

इन्द्राणीमासु नारिषु सुभगा महमश्रवम्।

न ह्यस्या च न जरसामरते पतिर्विश्वस्मादिन्द उत्तरः ॥

नाहमिन्द्राणी शरण सख्युर्वृषा कपेर्ऋते।

यस्येदमप्यं हविः प्रियं देवेषु गच्छति विश्वस्मादिन्द्र उत्तरः ॥

कुहूमहं सुकृतं विद्म्यनासमस्मिन्यज्ञे सुहवां जुहुवीमि।

या नो ददाति श्रवणं पितृणां तस्यैते देवि हविषा विधेम ॥
कुहुर्देवा नाममृतस्य पत्नी हव्या नो अस्य हविः श्रृणोतु।
स्वसा देवानां मह्यन्त्यस्मै रायस्पोषं चिकितुषे दधातु ॥
धातादधातु नो रयिमीशा नो जगतस्पतिः। स नः पूर्णेन वावनत् ॥
प्रजापती रमयतु प्रजा इह धाता दधातु सुमनस्यमानः।
संवत्सर ऋतुभिश्चाक्लृपानो मयि पुष्टिं पुष्टिपतिर्दधातु ॥

॥ देवाः सुराणाम् ॥

तव श्रिये व्यजहीत पर्वतो गवां गोत्रमुदसृजो यदङ्गिरः।
इन्द्रेण युजः तमसः परिवृतं बृहस्पतिं निरपामौब्जो अर्णवम् ॥
बृहस्पति अति यदर्यो अर्हद द्युमद्विभाति क्रतु मज्जनेषु।
यद्दीदयच्छवसर्त प्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥
बृहस्पतिः समजयद्वसूनि महोव्रजान्गोमतो देव एषः।
अपः सिषा सन्स्वर प्रतीतो बृहस्पतिर्हन्त्य मित्रमर्कैः ॥

यमो दधार पृथिवीं यमो द्यामुत सूर्यम्।
यमाय सर्वमित्तस्थे यत्प्राणाद्वायुरक्षितम्॥

यथा पञ्च यथा षड् यथा पञ्च दशर्षयः।
यमं यो विद्यात्स ब्रूयाद् यथैकार्षि र्विजानते॥

त्रिकद्रुकेभिः पतति षळुर्विरेकमिद् वृहत्।
गायत्री त्रिष्टुप छन्दांसि सर्वास्वास्तायम आहिता॥

मृळानो रुद्रो तनोमयस्कृधि क्षयद्वीराय नमसा विधेमते।
यच्छञ्च योश्च मनुरायेजे पितातदश्याम तवरुद्र प्रणीतिषु॥

अश्यामते सुमतिं देव यज्जययाक्षयद् वीरस्य तव रुद्रमीळः।
सुम्नायन्नऽद्विषो अस्माकमाचारारिष्टवीरा जुहवाम ते हविः॥

त्वेषं वयं रुद्रं यज्ञसाधनमकं कविमवसे निह्वयामहे।
आरे अस्मद् दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या वृणीमहे॥

अवते हेळो वरुण नमोभिरक्यज्ञे भिरीमहे हविर्भिः।
क्षयमस्मभ्यमसुर प्रचेतो राजन्नेनांसि शिश्रथाः कृतानि॥

उदुत्तमं वरुण पाशमस्वद वाधमं विमध्यं श्रथाय।
अथा वयमादित्य ब्रते तवानागसो आदि तये स्याम्॥

इमं मे वरुण श्रुधी हवमध्या च मृळाय त्वामवस्युराचके।
तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यमानो हर्विभिः॥

अहेळमानो वरुणेह बोध्यरुशंसमान आयुः प्रमोद षीः॥
ॐ भूर्लोकाय नमः॥ ॐ भुवोर्लोकाय नमः॥ ॐ स्वर्लोकाय नमः॥
ॐ भूर्भुवः स्वर्लोकाय नमो नमः॥

अग्नि मूर्धा दिवः ककुत्पतिः पृथिव्याः अयं अपां रेतांसि जिन्वति ॥
उमा वामिन्द्राग्नि आहुवध्या उभा राधसः सहमादयध्यै।
उभादातारायिषां रयीणामुभावाजस्य सातये हुवेवाम् ॥
अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्ववीडवः।
यम प्लवानो भृगवो तिररुचुर्वनेषु चित्रं विभुं विशे विशे ॥
अयं ते योनिर्ऋत्वियोयतो जात अरोचथः। ते जानन्नग्न आरोह ततोनोवर्धया रयिम् ॥
उपप्रयन्तो अध्वरं मन्त्रं वोचमाग्नये। आरे अस्मे च शृण्वते ॥
अस्य प्रत्ना मनुद्युतं शुक्रं दुदुहे अह्रया पयः सहस्रामृषिम् ॥
कदाचनस्तरीरसिनेन्द्र सश्चसि दाशुषो। उषो पेन्नु मघवन्भूय इन्नुतेदानं देवस्य पृच्यते।
परिते दूळभो रथोऽस्मा अश्नोतु विश्वतः। येन रक्षांसि दाशुषः ॥
यौ तेश्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षि नृचक्षसो।
ताभ्यामेनं परिदेहि राजन्स्वस्ति चास्मा अनमीवंचधेहि ॥
यत्र वेत्थ वनस्पते देवानां गुह्यनामानि तत्र हव्यानि गन्तय ॥
मुञ्चामि त्वा हविषा जीवनाय कर्मज्ञातयक्ष्मा दूतराजयक्ष्यमात् ॥
ग्राहि जंग्राह यदि वैतदेनं तस्या इन्द्राग्नि प्रमुमुक्तमेनम् ॥
अङ्ग दङ्गाल्लोम्नो लोम्नो जातं पर्वणि पर्वणि।
यक्ष्मं सर्वस्मादात्मनस्तमिमं विवृधामिते ॥
ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियोयो नः प्रचोदयात् ॥३ ॥
ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूर्यः। दिवीव चक्षुराततम् ॥

(१) मार्गशीर्षे : रुक्मिणी सहिताय कृष्णाय, श्रीस० केशवाया पौषे : प्रिया स० अनन्ताय, वागीश्वरी स० नारायणाय। माघे : प्रीति सहिताय अच्युताय, कान्ता स० माधवाय। फाल्गुने : शक्तिसहिताय चक्रिणे, क्रिया स० गोविन्दाय। चैत्रे: सिद्धि स० वैकुण्ठाय, मति सहि० विष्णवे। वैशाखे : शोभा सहिताय जनार्दनाय, विभूति सहि० मधुसूदनाय।

ऐन्द्रग्नं वर्म बहुलं यदुग्रं विश्वेदेवा नाति विध्यन्ति शूराः ।
तन्नस्त्रायतां तत्वः सर्वतो महदा युष्मन्तो जरामुपगच्छेम जीवाः ॥

● उक्त क्रियाके पश्चात् एक पात्र में दही और मधु मिलाकर 'सावित्राणि' मन्त्र से पूर्वार्चित् देव समुदाय का नाम लेकर मधुपर्क भेंट करें । यथाः

सावित्राणि सावित्रस्य देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे ॥ महागणपतये, कुमाराय, श्रियै, सरस्वत्यै, लक्ष्म्यै, विश्वकर्मणे-द्वारदेवताभ्यः । प्रजापतये, ब्रह्मणे-कलशदेवताभ्यः । ब्रह्मा, विष्णु, महेश्वरदेवताभ्यः । चतुर्वेदेश्वराय, [(२) ऋतुपतये नारायणाय], दुर्गायै, त्र्यम्बकाय, वरुणाय, यज्ञपुरुषाय । अग्निष्वातादिभ्यः, पितृगणदेवताभ्यः । अग्नये, पुष्टिपतये, प्रजापतये, अर्यम्णे, गन्धर्वाय, त्र्यम्बकाय विवाहोद्वाह-देवताभ्यः । मेषादिभ्यो द्वादशलग्नेभ्यः । अश्विन्यादिभ्यः सप्तविंशति नक्षत्रेभ्यः । भगवते वासुदेवाय, सङ्कर्षणाय, प्रद्युम्नाय, अनिरुद्धाय, सत्याय, पुरुषाय, अच्युताय, माधवाय, गोविन्दाय, सहस्रनाम्ने विष्णवे, लक्ष्मी सहिताय नारायणाय । भवायदेवाय, शर्वायदेवाय, रुद्रायदेवाय, पशुपतयेदेवाय, उग्रायदेवाय, भीमायदेवाय, महादेवाय, ईशानादेवाय, ईश्वरायदेवाय, उमासहिताय शिवाय, पार्वती सहिताय परमेश्वराय । विनायकाय, एकदन्ताय, कृष्ण पिङ्गलाय, गजाननाय, लम्बोदराय, भालचन्द्राय, आखुरथाय, विघ्नेशाय, विघ्नभक्षाय, वल्लभा सहिताय श्री महागणेशाय । क्लीङ्कां कुमाराय, मयूरवाहनाय, सेनाधिपतये कुमाराय । भगवते ह्रां ह्रीं सः सूर्याय, सप्ताश्वाय, अनश्वाय, एकाश्वाय, नीलाश्वाय, प्रत्यक्षदेवाय, परमार्थसाराय, तेजोरुपाय, प्रभा सहिताय आदित्याय । भगवत्यै अमायै, कामायै, टङ्कधारिण्यै, तारायै, पार्ववत्यै, यक्षिण्यै, श्री शारिका भगवत्यै, श्री शारदा भ०, श्री महाराज्ञी भ० श्री ज्वाला भ०, श्री ब्रीडा भ०, श्री वैखरी भ०, वितस्ता भ०, गङ्गा भ०, युमना भ०, कालिका भ०, सिद्धलक्ष्म्यै, महालक्ष्म्यै, महात्रिपुर-सुन्दर्यै, सहस्रनाम्न्यै देव्यै भवान्यै, अभयङ्करी देव्यै, क्षेमङ्करी भवान्यै, सर्व शत्रु घातिन्यै, इहराष्ट्राधिपतये । विष्णु पञ्चायतन देवताभ्यः । इन्द्राय, अग्नये, यमाय, नैर्ऋतये, वरुणाय, बायवे, कुबेराय, ईशानाय, ब्रह्मणे, विष्णवेदशदिक्पालेभ्यः ।

अनन्तादिभ्योऽष्टाभ्यो नागदेवताभ्यः । अग्न्यादित्याभ्यां, वरुणचन्द्रमाभ्यां, कुमार भौमाभ्यां, बिष्णु बुधाभ्यां, इन्द्रबृहस्पतिभ्यां, सरस्वती-शुक्राभ्यां, प्रजापति शनैश्चराभ्यां, गणपति राहुभ्यां, रुद्रकेतुभ्यां, ब्रह्मध्रुवाभ्यां, अनन्तागस्त्याभ्याम् । ब्रह्मणे, कूर्माय, ध्रुवाय, अनन्ताय, हरये, लक्ष्म्यै, कमलायै, शिख्यादिभ्यः पञ्चचत्वारिशद्वास्तोषपतियाग-देवताभ्यः । गौर्यादि मातृभ्यः । ललितादिभ्यो मातृभ्यः । दुर्गा क्षेत्र गणेश्वर देवताभ्यः, राकादेवताभ्यः, त्रिकादेवताभ्यः, सिनीवाली दे०, यामी दे०, कुहू दे०, रौद्री दे०, ऐन्द्री दे०, बार्हस्पत्य दे० ॐ भूर्देवताभ्यः, ॐ भुवर्दे०, ॐ स्वर्दे०

श्रावणे : कान्ति स० वासुदेवाय, रति स० श्री धराय । **भाद्रपदे:** लक्ष्मी स० यज्ञपुरुषाय, धृति स० वामनाय । **आपाढ़े :** महिमा स० उपेन्द्राय, इच्छा स० त्रिविक्रमाय । **ज्येष्ठे :** प्रकाम्य स० योगीश्वराय, धी स० पद्मनाभाय । **कार्तिके :** लघिमा स० पुण्डरीकाक्षाय, गरिमा स० दामोदराय । **आश्विने :** प्राप्ति स० हरये, माया स० ऋषिकेशाय । सत्यभामा सहिताय नरकारिये, निष्कला सहिताय मार्तण्डाय ॥
मलिम्लुचे-मलमासे : शक्ति सहिताय योगीश्वराय,

ॐ भूर्भुवः स्वर्देवताभ्यः, अखण्ड ब्रह्माण्ड देवताभ्यः, धूर्म्यः, उपधूर्म्यः, महागायत्र्यै, सावित्र्यै, सरस्वत्यै, हेरुकादिभ्यो, वटुकादिभ्यः, क्षेत्रेशदेवताभ्यस्तिलतण्डुल मात्रं दधिमधुमिश्रं नमो नैवेद्यं निवेदयामि नमः ॥ इसके पश्चात् निम्नोक्त वेदमन्त्रों से ईश प्रार्थना करें :

हिरण्यगर्भः समवर्त्ताग्रे भूतस्य जातः पतिरेक आसीत् ।
सदाधार पृथिवीं द्यामुत्तेमां कस्मैदेवाय हविषा विधेम ॥१॥
यः प्राणतो निमिषतश्च राजापतिर्विश्वस्य जगतो बभूव ।
ईश्यो अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम् ॥२॥
य ओजदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्यच्छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥३॥
येन द्यौरुग्रा पृथिवी दृढा येन सुस्तम्भितं येन नाकम् ।
यो अन्तरिक्षं विममे वरीयः कस्मै देवाय हविषा विधेम ॥४॥
य इमे द्यावा पृथिवी तस्तभाने यद् रोधसी रेजमाने ।
यस्मिन्नधि विनतः सुर ऐति कस्मै देवाय हविषा विधेम ॥५॥
यस्येमे विश्वे गिरियो महित्वा समुद्रं यस्य सहाऽहुः ।
दिशो यस्य प्रदिशा पञ्चदैवी कस्मै देवाय हविषा विधेम ॥६॥
आपोह यन महती र्विश्वमायु गर्भं दधाना जयन्तीरग्निम् ।
ततो देवानां निवर्वताऽसुरेकः कस्मै देवाय हविषा विधेम ॥७॥
आनः प्रजान् जन्यतु प्रजापति र्धाता दधातु सुमनस्यमानः ।
संवत्सर ऋतुभिश्चाक्लृपानो, मयि पुष्टिं पुष्टिपतिर्दधातु ॥८॥

नोट : इन उपर्युक्त यजुर्वेदोद्धृत मन्त्रों का अर्थ १३८ तः १४० पृष्ठों पर देखें ।

॥ द्वारदेवता पूजनम् ॥

अर्चन्तस्त्वा हवामहेऽर्चन्तः समि धीमहि अग्ने अर्चत ऊतये अर्चत।
प्रार्चत प्रिय मे धासो अर्चत अर्चन्तु पुत्रका उत पुरं न धृष्णुमर्चत ॥९ ॥

- ॥वरागमन से पूर्व ही आचार्य देव उक्तसारी क्रिया यथा विधि पूर्ण करले ॥

॥इति देवस्थापन-देवार्चनं च ॥

॥अथ द्वारदेवता पूजनम् ॥

- वर के आने पर घर के मुख्य द्वार पर वर तथा यजमान को लाकर, आचार्य उन के द्वारा द्वार-देवताओं की पूजा करावे । पूजा से पूर्व शुभकार्य के निर्विघ्न सम्पन्नार्थ विष्णु तथा गणेश की वन्दना करे । यथा :

शुक्लाम्बर धरं देवं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशान्तये ॥१ ॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः।
येषामिन्दीवरश्यामो हृदयस्थोजनार्दनः ॥२ ॥

विभृद दक्षिणहस्त पद्म युगले दन्ताक्ष सूत्रे शुभे,
वामे मोदक-पूर्ण पात्र परशु नागोपवीती त्रिदृक।
श्रीमान् सिंहयुग्मासनाश्रित युगे शंख्वौ वहन् मौलिमान्,
दिशादीश्वर पत्र एश भगवाँ ल्लम्बोदर शर्म्मणः ॥३ ॥

सुमुखश्चैकदन्तश्च, कपिलो गजकर्णकः।
लम्बोदरश्च विकटो, विघ्ननाशो विनायकः ॥४॥
धूम्रकेतुर्गणाध्यक्षो, भालचन्द्रो गजाननः।
द्वादशैतानिनामानि, गणेशस्य महात्मनः ॥५॥
विद्यारम्भे विवाहे च, प्रवेशे निर्गमे तथा।
संग्रामे संकटे चैव, विघ्नस्तस्य न जायते ॥६॥
अभिप्रेतार्थ सिद्ध्यर्थं, पूजितो यः सुरैरपि।
सर्व विघ्नहरेत्तस्मै, गणाधिपतये नमः ॥७॥

॥अथ कायशोधनम्॥

- वर तथा यजमान प्रणीत पात्रस्थ जल दो दर्भाओं से निम्न मन्त्रोच्चारण कर शरीर पर छिड़कें :

तीर्थे स्नेंय तीर्थमेव समानानाम्भवतिमानः।
शंशो अरुरुषो धूर्तिः प्राणङ्मर्त्यस्य रक्षाणो ब्रहणस्पते

॥पवित्र धारणम्॥

वसोः पवित्रम ऽसि शतधारं वसूनां पवित्रमऽसि सहस्त्रधारम्।
अयक्ष्मा वः प्रजया संसृजामि रायस्पोषेण बहुला भवन्तीः॥

- उक्त मन्त्र से वर तथा यजमान अपने दक्षिण हाथ की अनामिका अङ्गुली में कुश पवित्र धारण करें। [१]पवित्र चार, तीन अथवा दो ही कुशाओं से बनाना चाहिए, उन कुश पत्रों को बाँयीं ओर से दाँयीं तरफ लपेट कर ब्रह्मग्रंथी से बान्धने पर पवित्र बनता है। पवित्र धारण करना सब याज्ञिक कृत्यों तथा सन्ध्या वन्दनादि में प्रशस्त एवं अनिवार्य माना गया है। पवित्र अनामिका अंगुली के प्रथम और द्वितीय पर्व के मध्य धारण करना चाहिए।

(१) चतुर्भिः कुशपत्रेश्च त्रिभिर्द्वाभ्यामथापि वा। पवित्रं कार्येत् नित्यं प्रशस्तं सर्वकर्मसु ॥(की० पु०)

॥स्वात्म पूजनम् ॥

- निम्न मन्त्रसे वर एवं यजमान अपने-अपने मस्तक पर तिलक तथा सिर पर अर्घपुष्प धारण करें ।

ॐ परमात्मने पुरुषोत्तमाय पञ्चभूतात्मकाय विश्वात्मने मन्त्रनाथाय आत्मने नारायणाय आधार शक्तयै समालमनं गन्धो नमः ॥(गन्धलेपं निवर्यित्) एवं अर्घो नमः पुष्पं नमः ॥

॥अथ दीपम् ॥

सुप्रकाशो महादीपः, सर्व तिमिर नाशकः ।
प्रसीद मम गोविन्द, दीपोऽयं परिकल्पितः ॥

- उपरोक्त मन्त्र से विष्णु का ध्यान करके दीपक को नमस्कार करें । (१)यहां प्रायः इस बात का ध्यान रखा जावे कि दीपक किसी पीठ विशेष पर रखना चाहिए, पृथिवी पर रखना उचित नहीं । साथ ही दीपक में घी या तेल डालना चाहिए । दोनों मिलाकर कभी नहीं डाले ।

॥अथ धूपदानम् ॥ (धूप को नमस्कार करें)

वनस्पति रसो दिव्यो, गन्धाढ्यो गन्ध उत्तमः ।
आह्वानं सर्व देवानां, धूपोऽयं प्रतिगृह्यताम् ॥

॥सूर्य देव पूजनम् ॥ (सूर्य को नमस्कार)

- अर्घपुष्पादिसे सूर्य का पूजन करें । (२)देवपूजा प्रकरणमें प्रत्येक समय पर प्रारम्भिक पूजा सूर्य देव की ही करनी चाहिए । ऐसा ही शास्त्र का कथन है और जो सर्वथा वैज्ञानिक है ।

---

(१) सर्वसहावसुमती सहतेनत्विदं द्वयम् । अकार्य घातं च दीपतापं तथैव च ॥ न मिश्री कृत्य दद्यातु दीपे स्नेह घृतादिकान् । दत्वा मिश्रीकृतं स्नेहं तामिस्रं नरकंभवेत् ॥ का० पु० ॥ (२) यथा देवमयत्वच्च तरर्णिर्लोक पूजितः । तथा धूपोपहारैश्च पूज्येत् प्रथमं रविम् ॥ अपूज्य प्रथमं सूर्य, अपरान्यः प्रपूजयेत् । न तद्भूतकृतं पाद्यं समप्रतीक्षान्ति देवताः ॥ **॥स्कन्ध पुराणतः ॥**

नमो धर्म निधानाय, नमः सुकृति साक्षिणे।
नमः प्रत्यक्ष देवाय, भास्कराय नमो नमः ॥

॥अथ धूपदीप सङ्कल्पः ॥

● निम्नमन्त्र से द्वार देवताओं के लिए प्रणीत पात्र में जल लेकर धूपदीप संङ्कल्प करें : यथा—

यत्रास्ति माता न पिता न बन्धु, र्भ्रातापि नो यत्र सुहृज्जनश्च।
न ज्ञायते यत्र दिनं न रात्रि, स्तत्रापि दीपं शरणं प्रपद्ये।

ॐ तत्सदद्यतावत् मासोत्तमेऽमुकमासेऽमुकपक्षेऽमुकतिथौऽमुकवासरे महागणपतये, कुमाराय, श्रियै, सरस्वत्यै, लक्ष्म्यै, विश्वकर्मणे द्वारदेवताभ्यः, धर्मायाऽधर्माय देहिल्यै, खिङ्किन्यै मेरु प्राकार देवताभ्यः(वरकहे) आत्मोद्वाह निमित्तं (यजमानकहे) कन्योद्वाह निमितं (दोनों कहे) धूपदीप सङ्कल्पात् सिद्धिरस्तु धूपो नमः दीपं नमः ॥

● यहां 'अमुक' के स्थान पर मास, पक्ष, तिथि, वार का नाम लेना चाहिए।

'शन्नोदेवीरित्यापोऽभिमन्त्रयेत'

भाषा : 'शन्नोदेवी' इस मन्त्र से प्रणीत पात्र में शुद्ध जल लेकर उसे दो दर्भाओं के विष्टार से अभिमन्त्रित करें। यथाः

ॐ शन्नो देवीरभीष्टये आपो भवन्तु पीतये। शँय्योरभिस्रवन्तु नः ॥

'सं० वः सृजामीतिद्वाभ्यां त्रिपुष्पाणिक्षिपेत्'

भाषा : 'संव्वः सृजामि' आदि मन्त्र द्वय से अभिमंत्रितजल में तीन पुष्प डालें।

सव्वः सृजामि हृदयं, संसृष्टं मनो अस्तु वः।
संसृष्टास्तन्वः सन्तु वः, संसृष्टाः प्राणः अस्तु वः ॥१ ॥

संय्याव: प्रियास्तन्व: सं प्रिया हृदयानि व: ।
आत्मा वो अस्तु सं प्रिय: संप्रियास्तन्वो मम ॥२ ॥

- जीवाधानम्: निम्नमन्त्रसे अभिमंत्रित जल विष्टर से छिड़क कर द्वार देवताओं की प्राण प्रतिष्ठा करें : अश्विनोः प्राणस्तौते प्राणं दत्तां तेन जीव, मित्रावरुणयोः प्राणस्तवते प्राणन्दत्तां तेन जीव, बृहस्पतेः प्राणः स ते प्राणं ददातु तेन जीव ।

॥अथ पृच्छा ॥

- **पृच्छा का अर्थ है अगले कार्यक्रम के लिए प्रश्न उपस्थित करना । पूजा प्रकरण में सब से पूर्व पृच्छा का ही सम्पादन किया जाता है । पृच्छा और आसन प्रदान में षष्ठी,** [१]अर्ध्यदान में प्रथमा, आवाहन में द्वितीया और शेष कर्म में चतुर्थी विभक्ति का प्रयोग देव समुदाय के नामों के साथ करना चाहिए । वर तथा यजमान यव, तिल और सरसों हाथ में लेकर तीन बार गायत्री मन्त्र का उच्चारण करकें पृच्छा कृत्य करें । यथाः **ॐ गायत्र्यै नम:, ॐ भूर्भुव: स्व:, तत्सवितुर्वरेण्यं, भर्गो देवस्य धीमहि, धियो योन: प्रचोदयात् ॥३ ॥ ॐ तत्सदद्यतावत् मासोत्तमेऽमुकमासेऽमुकपक्षे अमुक तिथौऽमुकवासरे महागणपते:, कुमारस्य, श्रिय:, सरस्वत्या:, लक्ष्म्या:, विश्वकर्मण: द्वारदेवतानां, धर्मस्याऽधर्मस्य, देहिल्या:, खिङ्खिन्या:, मेरु प्राकर देवतानां** (वरकहे) **आत्मोद्वाह निमितं** (यजमान कहे) कन्योद्वाहिनिमितं (दोनों अलग-अलग कहें) **द्वार देवता पूजनमर्चामऽहं करिष्ये ।** (आचार्य कहे) **ॐकुरुष्व ॥ यवान्विकीर्य:** (हाथ में रखे यव के दानों को वर० यजमान इधर उधर फेंकें) इसके बाद द्वार देवताओं को यथाक्रम एक-एक दर्भाङ्कुर आसन रूपमें भेंट करें । यथाः वायवे **(पश्चिमोत्तर कोणमें)** महागणपतेः, नैर्ऋते **(दक्षिण पश्चिमकोण में)** कुमारस्य ईशाने **(पूर्वोत्तरकोण में)** श्रियाः, मध्ये **(बीचमें)** सरस्वत्याः, लक्ष्म्याः, अग्निकोणे (दक्षिणपूर्वकोण में) **विश्वकर्मण:,** ऊपरि (ऊपर की ओर) **धर्मस्य,** अधः (नीचे की ओर) **अधर्मस्य,** दक्षिणे **(दक्षिणमें)** देहिल्याः, उत्तरे **(उत्तरमें)** खिङ्खिन्याः मेरु प्राकार देवतानामिदंमासनं नमः ॥

- **पुन: वर और यजमान यव के कुछ दाने हाथ में लेकर :**

महागणपतये, कुमाराय, श्रियै, सरस्वत्यै, लक्ष्म्यै, विश्वकर्मणे द्वार देवताभ्य:

---

(१) पृच्छायामसने षष्ठी प्रथमाऽर्घ्य निवेदने द्वितीयाऽऽवाहने चैव चतुर्थी शेष कर्मणि ॥ (कर्मकाण्ड तः)

(दोनों पृथक-पृथक कहें) युष्मान् पूजयामि ॥ **(आचार्यकहे)** ॐ पूजय ॥

- पुनः यव के दाने हाथ में रखे हुए ही : महागणपितं, कुमारं, श्रियं, सरस्वतीं, लक्ष्मीं, विश्वकर्मणं— द्वारदेवताः, धर्मं, अधर्मं, देहिलीं, खिंखिनीं-मेरु प्राकार देवताः (वर-यजमान अलग कहें) आवाहयिष्यामि। (आचार्य कहे) ओ३म् आवाहय ॥ (हाथ में रखे यव के दाने इधर उधर फैंकें) पुनः वर को सम्बोधित कर :

(यजमान कहे) स्वागतं भोः। **(प्रत्युत्तर में वर कहे)** सुस्वागतम् ॥

- इसके पश्चात् पाद्यार्थ प्रणीतपात्र में जल लेकर आचार्य निम्न मन्त्र से उसे अभिमन्त्रित करे :

शन्नो देवीरभीष्टये आपो भवन्तु पीतये, शँय्योरभिस्त्रवन्तु नः ॥

॥अथ पाद्यार्थ—पाद्यद्रव्याणि ॥

लाजाश्च कुङ्कुमं चैव, सर्वौषधि समन्वितम्।
दर्भाङ्कुरे जलं चैव, पञ्चाङ्गं पाद्य लक्षणम् ॥

भाषा : लाजायें, केसर, [१]सर्वौषधि, दर्भदल तथा शुद्ध जल— इन द्रव्यों से युक्त पाद्य होता है।

- उक्त पाद्य द्रव्यों को अभिमंत्रित जल में मिलाकर दर्भाओं से द्वार देवताओं को पाद्यार्पण करें। यथाः महागणपतये, कुमाराय, श्रिये, सरस्वत्यै, लक्ष्म्यै, विश्वकर्मणे-द्वारदेवताभ्यः, धर्मायाऽधर्माय, देहिल्यै, खिंखिन्यै-मेरु प्राकार देवताभ्यः पाद्यं नमः ॥

(पाद्यशेषं निवार्येत्—पाद्यार्पण के बाद शेष जल कहीं स्वच्छ स्थान में फेंक दें)

(१) सर्वौषधि : मुरामांसी वचा कुष्ठं, शैलेयं रजनी द्वयम्।
सठी चम्पक मुस्ता च, सर्वौषधिः गणः स्मृतः ॥ मुरा, जटामासी, वच, कुठ, शिलाजीत, दारुहल्दी, सटी (कचूर), चम्पा तथा नागर मोथा ॥

● पुनः प्रणीत पात्र में शुद्ध जल लेकर अर्घ्य दानार्थ अभिमंत्रित करें । यथाः

शन्नो देवीरभीष्टये आपो भवन्तु पीतये । शँय्योरभिस्त्रवन्तुनः ॥

॥अर्घ्य द्रव्याणिः ॥

आपः क्षीरं कुशाग्राणि, घृतं च दधितण्डुलः ।
यवा सिद्धर्यर्थकाश्चैव, ह्यर्ध्यमष्टाङ्गमुच्यते ॥

भाषा : जल, दूध, कुशा, घृत, दही, चावल और जौ— ये द्रव्य अर्घ्य के अङ्ग हैं ॥

● **उक्त द्रव्यों को अभिमन्त्रित जल में मिलाकर द्वारदेवताओं को अर्ध्यार्पण करें** ॥ यथाः महागणपते, कुमार, श्रीः सरस्वती, लक्ष्मीः, विश्वकर्मन्-द्वारदेवताः, धर्माधर्म, देहली खिंखिनी मेरु प्राकार देवताः इदमोऽर्घ्यं नमः ॥

॥अथ गन्धम्— फिर तिलक चढ़ावें ॥

यथाः महागणपतये, कुमाराय, श्रियै, सरस्वत्यै, लक्ष्म्यै, विश्वकर्मणे-द्वारदेवताभ्यः, धर्मायाधर्माय, देहिल्यै, खिंखिन्यै-मेरु प्राकार देवताभ्यः समालभनं गन्धं नमः ॥

गन्धलेपं निवार्येत् । एवं अर्घो नमः पुष्पं नमः, धूपं नमः, दीपं नमः ॥

● इस प्रकार अर्घ्र, पुष्प, धूप, दीप, नैवेद्य, आचमन एवं दक्षिणा आदि पृथक-पृथक द्वार देवताओं को भेंट करें ॥ इस पूर्वोक्त क्रिया का सम्पादन कर वर और यजमान अपने-अपने हाथ में जल एवं यव के दाने लेकर आगे की क्रिया सम्पन्न करें । यथाः **ॐ भूर्भुवः स्वः, तत्सवितुर्वरेण्यं, भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयात् ॥३ ॥ महागणपते, कुमारस्य, श्रियः, सरस्वत्याः, लक्ष्म्याः, विश्वकर्मणः द्वारदेवतानां, धर्मस्या धर्मस्य, देहिल्याः, खिंखिन्याः - मेरु प्राकार देवतानां** (वर कहे) **आत्मोद्वाह निमितं** (यजमान कहे) **कन्योद्वाह निमितं** (दोनों कहे) **द्वारदेवतानां पूजनमच्छिदं सम्पूणमऽस्तु** ॥ (आचार्य कहे) **एवमस्तु ॥ यवोदकं नमः, उदकतर्पणं नमः ॥**

● ये शब्द कहकर अपने हाथों में रखा हुआ जौ और जल पृथिवी पर छोड़ दें ॥

अथान्ते नमस्कारम्

आपन्नोस्मि शरण्योसि सर्वावस्थासु सर्वदा ॥
भगवाँस्त्वां प्रपन्नोस्मि रक्षमांशरणागतम् ॥

पद्भ्यां कराभ्यां जानुभ्यां, शिरसा, उरुसा, मनसा, वचसा, कर्मणा च साष्टाङ्ग नमस्कारं करोमि नमः ॥ उपर्युक्त वाक्यों से अन्त में द्वार देवताओं को नमस्कार करके, वर को यजमान सादर यज्ञ मण्डप में ले आवे ॥

॥समाप्तोऽयं द्वारदेवता पूजन प्रकरणम् ॥

॥अथ रक्षोघ्नमन्त्राः ॥

- **'अग्निशरवेतिलहोमः'**—यज्ञमण्डप में यथोचित् स्थान पर वर के बैठ जाने पर आचार्य एक शराव में (थाली अथवा कम गहरे पात्र में) अग्नि को अपने सम्मुख करवा कर रक्षोघ्न मन्त्रों से विघ्न प्रशमनार्थ तिल तथा सरसों का होम करे ॥

अच्छिन्नो दैव्यस्तन्तुर्मा मानुष्यच्छिदिनिप्रदोऽसी
दामहं तन्निमृणामि योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ॥
विभूरस्यऽप्रहतं भूयासं योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ।
प्रभूरस्यऽबृहन्तमति भूयासं योस्मान्द्वेष्टि यं च वयं द्विष्मः ॥

पूषा मा प्रपथे पातु, पूषा मा पशुपाः पातु, पूषा माऽधिपति पातु ॥
प्राचीदिगाग्निर्देवताऽग्निं सऋच्छतु, यो मैतस्यादिशोऽभिदासति ॥
दक्षिणादिगिन्द्रो देवतेन्द्रं स ऋच्छतु, यो मैतस्या दिशोऽभिदासति ॥
प्रतीची दिक्सोमो देवतासोमं स ऋच्छतु, यो मैतस्यादिशोऽभिदासति ॥
उदीची दिक्मित्रावरुणौदेवता मित्रावरुणौस ऋच्छतु, यो मैतस्यादिशोऽभिदासति ॥
ऊर्ध्वा दिग्बृहस्पतिर्देवा बृहस्पतिं स ऋच्छतु, यो मैतस्यादिशोऽभिदासति ॥
इन्दिगऽदितिर्देवाऽदितं स ऋच्छतु, यो मैतस्यादिशोऽभिदासति ॥
ज्योतिषे तन्तव आशिष्यामाशास्ते साऽनुमातन्,
इष्टुर्वा ब्रह्माणि प्रजापतेरग्निर्विष्णवे ।
अग्नये पथिकृतेऽष्टकपालं निर्वपेदस्याः, पौर्णमासीवाऽमावस्यावाऽतिपद्यते ॥
बर्हिष्पथं वा एष एति यस्याः, पौर्णमासीवाऽमावस्यावाऽति पद्यते ॥
अग्निर्देवानां पथिकृतमेवान्वारभते, स एनं पंथामपि नयति विवा एतद्यज्ञं

छिनति, यद्यज्ञे प्रतत एतां अन्तेरष्टिर्निर्वपति, य एवा सा अग्नयोऽष्टकपालः,
पौर्णमासेयोमावस्यां तमग्नये पथिकृते, कूर्यात्तेनैव पुनः पन्थामे वैतिन यज्ञं,
विच्छिन्नत्यग्नये वाजसृतेऽष्टकपालं निर्वपेत् ॥

सङ्ग्रामेऽग्निर्वैदेवानां वाजसृद्वाजमेष धावति,
य: संग्रामं जयति तमेव भागधेयेनोपधावति,
वाजमेव धावति जयति संग्राममथो अग्निरेव,
न प्रति धृषे भवत्यग्नये व्रतपतयेऽष्टकपालं निर्वपेत्,
य अहिताग्निः सन्न व्रतं चरेदाऽनीतो वा ऐष देवानां,
य अहिताग्निरदत्यस्यान्नं व्रतपतिमेतस्य व्रतं गच्छति,
य अहिताग्निः सन्नव्रतं चरत्यग्निर्देवानां व्रतपतिस्तमेव,
भागधेयेनोपधावति, व्रतपतिरेवाधिव्रतमा-
लभतेऽग्नये रक्षोघ्नेऽष्टाकपालं निर्वपेत् ॥
आमयावीन्द्रं वैजातं रक्षास्यऽस्य सचन्त स अदीयमानो,
रक्षोभिः समृषमानोऽग्निं प्राविशत् तस्मादग्नि रक्षांयस्याऽस्य पाहन् रक्षास्येतं सचन्ते, य आमया व्यऽग्निर्देवानां रक्षोहा,
तमेवभाग धेयोपधावति, सोऽस्मान् रक्षांस्यपहन्त्यऽमावस्यां रात्रीं,
निशिजयतोऽमावस्यां रात्रीं, निशि रक्षांसि प्रेरते पूर्णान्येवै नान्यवपति
परिश्रिते यजेत रक्षसामऽन्तर्हित्यै ॥
वामोदेवस्यैतत्पञ्चदशं रक्षोघ्नं सामिधेन्यो भवति,
वामदेवश्चैव कुसिदायी चात्मनो राजिमयां तांतस्य-
कुसीदायी, पूर्वस्यातिद्रुतस्य कुभारण्यमृणात्सा द्वितीया-
मुपर्यावर्तत्, तेषां वार्क्षं वा छेत्स्यामीति सवामदेव,
उख्यमग्निमभिभरुस्तमेवैक्षत्, स एत त्सूक्तमश्यत् कृणुष्व पाजः प्रसिति,
न पृथ्वी मितितामग्निरनुद्रुत्य समदहत्सा दह्यमाना,
हृदं कौसिदं प्रामञ्चद्यदेतदनूच्यते रक्षसां दुष्टयै ॥

(कृणुष्व पञ्चोनारक्षोघ्नं वामदेवस्य गौतमपुत्रस्य)

कृणुष्व पाजः प्रसितिर्न पृथ्वीं या हि राजे वामो इमेन।
तृष्वीमनु प्रसितिद्रोणानोस्थासि विध्य रक्षस्तपिष्टैः॥

तव भ्रमाम आशुया पतन्त्यनुस्पृश्य धृषता शोशुचानः।
तं पूष्यग्ने जुह्वा पतङ्गान सन्दतो विसृज विश्व गुल्काः॥

प्रतिस्पशो विसृज तूर्णितमो भवापयोर्विशो अस्या अदब्धः।
यो नो दूरे अधशंसो यो अन्त्यग्नेमा किष्टे व्यधिराधदर्षीत्॥

उदग्ने तिष्ठन्प्रत्यातनुष्वन्यमित्राँ ओषात्तिग्महेते।
यो नो अरातिं समिधानचक्रे नीचास्तं ध्यक्षतमन्नशुष्कम्॥

ऊर्ध्वो भव प्रति विध्याद्य स्मादविष्कृणुष्व देव्यान्यग्निः।
अवस्थिरा तनूहि या तु जूनां जामिभजामिं प्रमृणीहिशत्रून्॥

स तेजानाति सुमतिं यविष्ट य ईवते ब्रह्मणे गातुमैरत्।
विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो विदुरो अभिद्यौत्॥

सेदग्ने अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषाय उक्थै।
पि प्रीपति स्वआयुषे दुरोणे विश्वेदस्मै सुदिना स सदिष्टः॥

अर्चामिते सुमति घोष्यर्वाक् सन्ते वावाता जरतामियङ्गीः।
स्वश्वस्त्वा सुरथा मार्जयेमास्मे क्षत्राणि धारयेरनुद्यन्॥

इहत्वा भूर्याचरेदुपत्सान्दोषा वस्तुर्दीदिवांसमनुद्यून्।
क्रीडन्तस्त्वा सुमनसः सपेमाभिद्युम्ना तस्थिवांसोजनानाम्॥

यस्त्वा स्वश्वः सुहिरण्यो अग्ने उपयाति वसुमता रथेन।

तस्य त्राता भवतितस्य सखा यस्त आतिथ्यमानुषग्जुजोषत् ॥
महोरुजामि बन्धुता वचोभिस्तन्मापि तुर्गो तमादान्वियाय ।
त्वन्नो अस्य वचसश्चिकिद्धि होतर्यतिष्ट सुकृतोदमूना: ॥
अस्वप्रजास्तरण्य: सुशेवा अतन्द्रासोऽवृका अश्रमिष्ठ: ।
ते पायव: सध्यूञ्चो निषद्याग्ने तव न: पान्त्वमूर ॥
ये पायवो मामतेयन्ते अग्ने पश्यन्तो अन्धं दुरिताद रक्षत् ।
ररक्षवान्सुकृतोर्विश्ववेदादिप्सन्त इन्द्रिमवोनाहदेभु: ॥
त्वया वयं स धन्यस्त्वोतास्तव प्रणीत्य श्याम वाजन् ।
उभा शंसा सूदया सत्यता तेनऽनुष्टया कृणुह्यह्रियाण: ॥
अयाते अग्रे समिधा विधेम प्रतिस्तोमं शस्यमानं गृभाय ।
दहाशंसो रक्षस: पाह्यस्मान्द्रुहोनिधोमित्रमहो अवद्यात् ॥
(उदस्थाद्धनजित्यहोरौशनस्य् ब्रह्मजज्ञानमिति स्वयंभुवो ब्रह्मणा:
ऐन्द्राग्निमिति वायुवोरार्षम्) यथा—
उदस्थाद्धन जिद्गोजिदश्वजिद्धिरण्यजित्सूनृत्या परिवृत: ।
एतच्चकेण सविता रथेनोर्जाभागं पृथिवीमेत्यापृणन ॥
सं वरत्रान्धातन निराहावं कृणोतन ।
सिञ्चामहा अवतं वयमुद्रिणं विश्वाहादस्तमक्षितम् ॥
- ब्रह्मज ज्ञानं प्रथमं पुरस्ताद् विसीमत: सुरुचो वे न आव: ।
स बुध्न्या उपमा अस्य विष्ठा: सतश्चयोनिमसतश्चविव: ॥
अनाप्त्यायाव: प्रथमा यस्यां कर्माणि कुर्वते ।
वीरान्नो अत्रमादभन् तद्व: एतत् पुरोदधे ॥

पूर्यूषू प्रधन्व वाजसातये परिवृत्राणि सक्षणिः ।
द्विषस्तरध्या ऋणया न ईयसे ॥

सहस्त्रधारेऽवते समस्वरन्दिवो नाके मधु जिह्वा असश्चतः ।
तस्यस्पृशो न निमिषन्ति भूर्णयः पदे पदे पाशिनः सन्ति सेतवः ॥

मलिम्लुचो नामाऽसि त्र्योदशमासः इन्द्रस्य शर्मा सीन्द्रस्य वर्मा सीन्द्रस्य वरूथमसि ।

तंत्वा प्रपद्ये सगोः साश्वः सपुरुषः सहयन्मेस्थिते
न स मे शर्म च वर्म च भव गायत्री लोभभि प्रविशामि ॥

त्रैष्टुभं त्वचा प्रविशामि जगतीं मासेन प्रविशामि ।
अनुष्टुभस्ध्या प्रविशामि पंक्तिर्मज्जा प्रविशामि ॥

ऐन्द्राग्नं वर्म बहुलं यदुग्रं विश्वेदेवा नाति विध्यन्ति शूराः ।
तन्नस्त्रायतां तन्वः सर्वतो महदायुष्मन्तो जरामुपगच्छेम जीवः ॥

॥इति रक्षोघ्न मन्त्राः ॥

- रक्षोघ्नमन्त्र की समाप्ति पर अग्निशराव किसी पवित्र स्थान पर लेजाकर रखा जावे वा नदी में डाल दिया जावे ॥

॥ अधुनात्र देवार्चनम् ॥

- 'वर' तथा 'कन्या का पिता' ग्रह मण्डलस्थ देवसमुदाय की क्रम पूर्वक पूजा करें । इस स्थल पर कायशोधन आदि सब क्रियाऐं 'द्वार देवता पूजन' के समान ही करनी चाहिऐं । यथा—

॥कायशोधनम् ॥ (शरीर पर पानी की छीटें देना)

तीर्थे स्नेयं तीर्थमेव समानानां भवति मानः ।
शंसो अरुरुषो धूर्ति प्राणङ्मर्त्यस्य रक्षाणो ब्रह्मणस्पतिः ॥

॥पवित्र धारणम् ॥

वसो पवित्रमसि शत धारं वसो पवित्रमसि सहस्त्रधारम् ।
अयक्ष्मावः प्रजया संस्त्रजामि रायस्पोषेण बहुलाभवन्ति ॥

॥स्वात्म पूजनम् ॥ (तिलककरें)

ॐ परमात्मने पुरुषोत्तमाय पञ्चभूतात्मकाय विश्वात्मने नारायणाय
आधार शक्तये समालभनं गन्धो नमः ॥
गन्धलेपं निवार्येत् ॥ एवं अर्घो नमः पुष्पं नमः ॥

॥ दीप पूजनम् ॥ (दीपक को नमस्कार)

सुप्रकाशो महादीपः सर्व तिमिर नाशकः ।
प्रसीद मम गोविन्द दीपोऽयं परिकल्पितः ॥

॥ धूप पूजनम् ॥ (धूप को नमस्कार)

वनस्पति रसो दिव्यो गन्धाढयो गन्धोत्तमः ।
आह्वानं सर्व देवानां धूपोऽयं प्रतिगृह्यताम् ॥

॥ सूर्य पूजनम् ॥ (सूर्य देव को नमस्कार)

नमो धर्मनिधानाय नमः सुकृति साक्षिणे ।
नमः प्रत्यक्ष देवाय भास्कराय नमो नमः ॥

॥ धूपदीप सङ्कल्पः ॥

यत्रास्ति मातां न पिता न बन्धु र्भ्रातापि नोयत्र सुहृज्जनश्च ।
न ज्ञायते यत्र दिनं न रात्रि स्तत्रापि दीपं शरणं प्रपद्ये ॥

ॐ तत्सदद्यतावत् मासोत्तमे महामांगल्यप्रदेऽमुकमासेऽमुक पक्षेऽमुक तिथौऽमुकवासरे महागणपतये, कुमाराय, श्रियै, सरस्वत्यै, लक्ष्म्यै, विश्वकर्मणे-द्वारदेवताभ्यः । प्रजापतये, ब्रह्मणे, कलशदेवताभ्यः । चतुर्वेदेश्वराय, (ऋतुपतये नारायणाय) । दुर्गायै, त्र्यम्बकाय, वरुणाय, यज्ञपुरुपाय, अग्निश्वातादिभ्यः, पितृगणदेवताभ्यः, अग्नये, पुष्टिपतये, प्रजापतये, अर्यम्णे, गन्धर्वाय, त्रयम्बकाय,—विवाहोद्वाह देवताभ्यः । मेषादिभ्यो द्वादशलग्नेभ्यः । अश्विन्यादिभ्यः सप्तविंशाति नक्षत्रेभ्यः । भगवते वासुदेवाय, भवायदेवाय, विनायकाय, ह्रां ह्रीं सः सूर्याय, भगवत्यै आमायै, विष्णु-पञ्चायतन देवताभ्यः । इन्द्राय, अग्नयै, यमाय, नैर्ऋत्यै, वरुणाय, वायवे, कुबेराय, ईशानाय, ब्रह्मणे, विष्णवे-दशदिक्पाल देवताभ्यः । अनन्तादिभ्योऽष्टा कुलनाग-देवताभ्यः । अग्नयादित्याभ्यां, वरुणचन्द्रमसोभ्यां, कुमार भौमाभ्यां, विष्णुबुधाभ्यां, इन्द्र बृहस्पतिभ्यां, सरस्वतीशुक्राभ्यां, प्रजापतेशनैश्चराभ्यां, गणपतिराहुभ्यां, रुद्रकेतुभ्यां, ब्रह्मध्रुवाभ्यां, अनन्तागस्तत्याभ्याम् । ब्रह्मणे,

कूर्माय, अनन्ताय, हरये, लक्ष्म्यै, कमलाय, शिख्यादिभ्यः पञ्चचत्वारिंशत्वास्तोष्पति देवताभ्यः **(वर कहे)** आत्मोद्वाह निमितं **(यजमानकहे)** कन्योद्वाहनिमितं—धूपदीप सङ्कल्पात्सिद्धिरऽस्तु धूपो नमः दीपं नमः ॥

- अब तिल, सरसों और जो हाथ में लेकर पृच्छा सम्पादन करें । यथाः

ॐ गायत्र्यै नमः । ॐ भूर्भुवः स्वः, तत्सवितुर्वरेण्यं, भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयात् ॥३ ॥ ॐ तत्सदद्यतावत् मासोत्तमे महामांगल्यप्रदेऽमुकमासे, ऽमुक पक्षेऽमुकतिथौऽमुकवासरे महागणपतिः, कुमारस्य, श्रियः सरस्वत्याः, लक्ष्म्याः, विश्वकर्मणः—द्वारदेवतानाम् । प्रजापते, ब्रह्मणः कलशदेवतानाम् । ब्रह्मविष्णु महेश्वर देवतानाम् । चतुर्वेदिश्वस्य, (ऋतुपते नारायणस्य) , दुर्गायाः, त्र्यम्बकस्य, वरुणस्य, यज्ञपुरुषस्य, अग्निष्वातादिनां, पितृगणदेवतानाम् । अग्नेः, पुष्टिपते, प्रजापतेः, अर्यम्णे, गन्धर्वस्य, त्र्यम्बकस्य-विवाहोद्वाह देवतानाम् । अग्नेः, वायुः, सूर्यस्य, चन्द्रमसः, विष्णोः प्रायाश्चितयागदेवतानाम् । मेषादिनां द्वादश लग्नानाम् । अश्विन्यादिनां सप्तविंशाति नक्षत्राणाम् । वायवादिनां विष्णुपञ्चायतन देवतानाम् । इन्द्रादिनां दशदिक्पाल देवतानाम् । अनन्तादिनामऽष्टा कुलनागदेवतानाम् । आदित्यादिनामैकदशग्रहाणाम् । अखण्ड ब्रह्माण्डदेवतानाम् । हेरुकादिनां, वटुकादिनाम् (वरकहे) **आत्मोद्वाह निमितं** (यजमान कहे) **कन्योद्वाह निमितं (दोनों अलग-अलग कहें) अर्चामऽहं करिष्ये । (आचार्य कहे) ॐ कुरुष्व ।** यवान् विकीर्य ॥

- 'तिलसर्षपयवान्विकीर्य'— हाथ में रखे तिलादि इधर उधर फैंक दें ।

॥अथासनम् ॥

- पुनः देवताओं के नामों का उच्चारण करते हुए ग्रहमण्डल में प्रत्येक देवता के अपने-अपने कोष्ठक में एक-एक दर्भाङ्कुर आसन रूप में भेंट करें । यथाः

महागणपतिः, कुमारस्य, श्रियः, सरस्वत्याः, लक्ष्म्याः, विश्वकर्मणः द्वारदेवतानाम् । प्रजापतेः, ब्रह्मणः, कलशदेवतानाम् । ब्रह्म विष्णु महेश्वर देवतानाम् । चतर्वेदिश्वरस्य,(ऋतुपते नारायणस्य) । दुर्गायाः, त्रयम्बकस्य, वरुणस्य, यज्ञपुरुषस्य, अग्निश्वातादिनाम् पितृगणदेवतानाम । अग्नेः, पुष्टिपतेः प्रजापतेः । अर्यम्णः, गन्धर्वस्य, त्र्यम्बकस्य—विवाहोद्वाहदेवतानाम् । अग्नेः, वायोः, सूर्यस्य, चन्द्रमसः, विष्णोः प्रायश्चित देवतानाम् । मेषादिनां द्वादशलग्नानाम् । अश्वन्यादिनां सप्तविंशाति नक्षत्राणाम् । वासुदेवादिनां विष्णु पञ्चायतन देवतानाम्, इन्द्रादिनां दशदिक्पाल देवतानां, अनन्तादिनामऽष्टकुल नागदेवतानाम् । अदित्यादिनामैकादश ग्रहाणाम् । हेरुकादिनां, वटुकादिनां इदमासनं नमः ॥

● **पुनः हाथ में यव के कुछ दाने लेकर अगली क्रिया। यथा :**

महागणपतये, कुमाराय, श्रिये, सरस्वत्यै, लक्ष्म्यै, विश्वकर्मणे—द्वारदेवताभ्यः। प्रजापतये, ब्रह्मणे-कलशदेवताभ्यः। ब्रह्मविष्णु महेश्वर देवताभ्यः। चतुर्वेदेश्वराय, (ऋतुपते नारायणाय), दुर्गायै, त्र्यम्बकाय, वरुणाय, यज्ञपुरुषाय, अग्निष्वातादिभ्यः, पितृगण देवताभ्याः) अग्नये, पुष्टिपतयेः, प्रजापतयेः, अर्यम्णे, गन्धर्वाय, त्र्यम्बकाय-विवाहोद्वाह देवताभ्यः। अग्नये, वायवे, सूर्याय, चन्द्रमसे, विष्णवे प्रायाश्चितदेवताभ्यः। मेषादिभ्योद्वादश लग्नेभ्यः। अश्विन्यादिभ्यः सप्तविंशति नक्षत्रेभ्यः। भगवते वासुदेवाय, भगवते भवाय देवादिभ्यः विष्णुपञ्चायतन देवताभ्यः। अनन्तदिभ्योऽष्टकुल नागदेवताभ्यः। आदित्यादिभ्यः एकादशग्रहेभ्यः। अखण्ड ब्रह्माण्ड देवताभ्यः, हेरुकादिभ्यः, वटुकादिभ्यः, क्षेत्रेशदेवताभ्योः (वर-यजमान् पृथक-पृथक कहें) युष्मान् पूजयामि ॥ (आचार्य कहे) ॐ पूजय ॥

● जौ के दाने हाथ में रखे हुए ही—

महागणपतिं, कमारं, श्रीं, सरस्वतीं, लक्ष्मीं, विश्वकर्मणं—द्वारदेवताः। प्रजापतिं ब्रह्माणं—द्वारदेवताः। प्रजापतिं ब्रह्माणं-कलशदेवताः। चतुर्वेदेश्वरं, (ऋतु पतिनारायणम्) , दुर्गां, त्र्यम्बकं, वरुणं, यज्ञ पुरुषं, अग्निष्वातादीन् पितृगणदेवताः। अग्निं, पुष्टिपतिं, प्रजापतिं, गन्धर्वं, त्र्यम्बकं विवाहोद्वाहदेवताः। अग्निं, वायुं, सूर्यं, चन्द्रमसं, विष्णुं प्रायश्चितयागदेवताः। मेषादीन् द्वादश-लग्नानि। अश्विन्यादीन् सप्त विंशति नक्षत्राणि। वासुदेवादीन् विष्णु पञ्चायतन-देवताः। इन्द्रादीन् दशलोकपाल देवताः। आदित्यादीनैकादशग्रहान्, अखण्ड-ब्रह्माण्डदेवताः। हेरुकादीन्, वटुकादीन् (वर-यजमान् पृथक-पृथक कहें)—**युष्मान् आवाहयिष्यामि।** (आचार्यकहे)— **ॐ आवाह्य ॥**

● वर-यजमान अपने-अपने दक्षिण हाथ में रखे जौ के दाने बायें हाथ में रखकर दक्षिण हाथ से एक-एक पुष्प दल (पत्र) (मन्त्र समाप्ति पर) छोड़कर प्रत्येक देवता का यथा क्रम निम्न अनुष्टुप् छन्दों तथा वेदमन्त्रों से आवाहन क्रिया का सम्पादन करें। यथा—

॥आवाहनानि ॥

॥गणेशस्यादौ ॥

आवाहयाम्यहं देवं, गणेशं सुरपूजितम्।
सदैव विघ्न हर्तारं, सर्वकामफलप्रदम् ॥

रक्त वर्णो महातेजा, रक्तस्त्रिग्दामभूषितः।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम् ॥

निषुसीदगणपते गणेषुत्वाहुर्विप्रतं कविनाम्।
न ऋते त्वत्क्रियते किञ्चनारे महामर्कमघवञ्चिमर्च ॥
॥इतिमन्त्रः ॥

॥कुमाररस्य ॥

आवाहयाम्यहंदेवं, कुमारं षणमुखं प्रभुम्।
मयूरासनमारूढं, भक्ता नामऽभयङ्करम् ॥
शुक्लवर्णो महातेजा, शुक्ल स्त्रिग्दामभूषिताः।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम् ॥
कुमारं मातः युवतिः समुब्दं गुहाविभार्ति न ददाति पित्रे।
अनीकमस्य न निमज्जनासः पुरा पश्यन्तिमारुतौ ॥इतिमन्त्रः ॥

॥श्रियः ॥

आगच्छागच्छदेवेशि! क्षीरार्णव समुद्भवे।
लोकानामुपकारार्थं, सन्निधं कुरु सर्वदा ॥
रक्तवर्णोमहातेजा, रक्तस्त्रिग्दामभूषिताः।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम् ॥
अश्वपूर्वां रथमध्यां हस्ति नाद प्रमोदिनीम्।
श्रियं देवीं उपह्वये श्रीर्मा देवि जुषताम् ॥इतिमन्त्रः ॥

॥सरस्वत्याः ॥

आवाहयाम्यहं देवीं, वागीशीं वाक्यप्रदायिनीम्।
हंस संस्थां सुरदितिजैः, पूजितं विघ्नहारिणीम् ॥

शुक्लवर्णो महातेजा, शुक्ल स्रिग्दामभूषिताः ।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम् ॥
इयं शुष्मेभिर्विसखा इवरुजत्सानु गिरीणां तविषेभिरुर्मिभिः ।
पारावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमा विवासेमधीतिभिः ॥
॥इतिमन्त्रः ॥

॥लक्ष्म्याः ॥

आवाहयाम्यहं देवीं; लक्ष्मीं त्रैलोक्य पूजिताम् ।
भक्तं मोहाकुलमार्तं, पश्यन्ति स्निग्ध चक्षुषा ॥
रक्तवर्णो महातेजा रक्त स्रिग्दामभूषितः ।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम् ॥
कांस्यास्मितां हिरण्य प्राकारां आऽर्द्रां ज्वलन्तीं तृपतां तर्पयन्तीम् ।
पद्मेस्थितां पद्मवर्णां तामि होपह्वये श्रियम् ॥इतिमन्त्रः ॥

॥विश्वकर्मणः ॥

आवाहयाम्यहं देवं, विश्वकर्मणमीश्वरम् ।
सर्वदेवगणानांच, सदाशिल्प प्रवर्तकम् ॥
शुक्लवर्णो महातेजा, शुक्लस्रिग्दामभूषितः ।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम् ॥
विश्वकर्मा विश्वदेवो विश्वजिद् विश्वदर्शितः ।
ते त्वा घृतस्यधारया श्रैष्ठ्याय समभूषत ॥इतिमन्त्रः ॥

॥ब्रह्मण: ॥

आवाहयाम्यहं देवं, ब्रह्माणं च चतुर्भुजम्।
हंस यानं स्वक्षमाला, कमण्डलुधरं प्रभुम्॥
रक्त वर्णो महातेजा, रक्तस्त्रिग्दामभूषित:।
बलि: पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम्॥
ब्रह्मदेवानां पदवी: कविनामृषिर्विप्राणां महिषो मृगाणाम्।
श्येनोगृध्राणां स्वदितिर्वनानां सोम: पवित्रमत्येतिरेमन्॥इतिमन्त्र:॥

॥विष्णो: ॥

आवाहयाम्यहं देवं, गदाशंखाब्जचक्रिणम्।
अतसी पुष्पसङ्काशं, पीत वाससमच्युत्तम्॥
पीतवर्णो महातेजा, पीतस्त्रग्दामभूषित:।
बलि: पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम्॥
प्रतद्विष्णु: स्तवते वीर्येण मृगो न भीम: कुचरो गरिष्ठ:।
यस्यो रुषो व्रिशु विक्रमणेश्वऽधिक्षयन्ति भुवनानिविश्वा॥इतिमन्त्र:॥

॥शङ्करस्य॥

आवाहयाभ्यहं देवं, ईश्वरं पार्वतीपतिम्।
वृषभासनमारूढं, नागाभरणभूषितम्॥
शुक्लवर्णो महातेजा, शुक्लस्त्रिग्दामभूषित:।
बलि: पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम्॥
यो रुद्रौ अग्नौ यो अप्सु य ओषधीषु यो वनस्पतिषु।
यो रुद्रो विश्व भुवना विवेश तस्मै रुद्राय नमोऽस्तु देवा:॥इतिमन्त्र:॥

॥दुर्गायाः ॥

आवाहयाम्यहं दुर्गां, शंख चाप शरान्विताम्।
त्रिशूलहस्तांवरदां, त्रिनेत्रां चारु हासिनीम् ॥

रक्तवर्णो महातेजा, रक्तस्त्रिग्दामभूषिताः।
बलिः पुष्पं-वस्श्चैव, धूपोऽयं प्रतिगृह्यताम् ॥

जातवेदसे सुनवाम सोममऽरातीयतो निदहातिवेदाः।
स नस्पर्शदऽति दुर्गाणि विश्वासिन्धुं दुरितात्यग्निर्नमः ॥इतिमन्त्रः ॥

॥इन्द्रस्य ॥

आवाहयाम्यहं देवं, वज्रहस्तं शचीपतिम्।
ऐरावतसमारूढं, पूर्वस्यां दिशि पूजयेत ॥

पीतवर्णो महातेजा, पीतस्त्रिग्दामभूषितः।
बलि पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम् ॥

इन्द्रापर्वता बृहता रथेन वामीरिष आवहतं सुवीराः।
वीतं हव्यान्यध्वरेषुदेवा वर्धेथां गीर्भिरिळयामदन्ताम् ॥इतिमन्त्रः ॥

॥अग्नेः ॥

आवाहयाम्यहं देवं, रक्तं वैश्वानरं तथा।
शक्तिहस्तं शुकारूढं, आग्नेयां दिशि पूजयेत् ॥

रक्तवर्णो महातेजा, रक्तस्त्रिग्दामभूषितः।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम् ॥

अग्निः सप्तिं वाजम्भरं ददात्यग्निर्वीरं श्रुत्यं कर्म निष्ठम्।
अग्निरोदसी विचरत्समञ्जन्नग्निर्नारीं वीरकुक्षिं पुरन्धिम् ॥इतिमन्त्रः ॥

॥यमस्य ॥

आवाहयाम्हं देवं, धर्म राजं महाबलिम्।
महिषासनमारूढं, दक्षिणां दिशि पूजयेत्॥
पीतवर्णो महातेजा, पीतस्त्रिग्दामभूपिता।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम्॥
यमो दधार पृथिवीं यमोद्यामुत सूर्यम्।
यमाय सर्वमित्तस्थे यत्प्राणाद्वायुरक्षितम्॥इतिमन्त्रः॥

॥ नैर्ऋतेः ॥

आवाहयाम्यहं देवं, नैर्ऋतं दैत्य पूजितम्।
खड्ग पाणिं रक्षो व्याप्तं नैर्ऋत्यां दिशि पूजयेत्॥
नील वर्णो महातेजः, नील स्त्रिग्दामभूपितः।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम्॥
यन्ते देवी नैर्ऋतिराबबन्ध पाशं ग्रीवास्व विचर्त्यम्।
तन्तेविष्याम्यायुपोनुमध्येथा विषितः पितंऽद्धि प्रमुक्तः॥इतिमन्त्रः॥

॥वरुणस्य ॥

आवाहयाम्यहं देवं, वरुणं यादसां पतिम्।
पाशहस्तं तिमिवाहं, पश्चिमां दिशि पूजयेत्॥
श्याम वर्णो महातेजा, श्यामस्त्रिग्दामभूपितः।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम्॥
उदुत्तमं वरुणपाशमस्मदऽवाधमं विमध्यं श्रथाय।
अथावयमादित्यव्रते तवानागसोऽदित्येस्याम्॥इतिमंत्रः॥

॥वायोः॥

आवाहयाम्यहं देवं, मारुतं ध्वज धारिणम्।
सर्वेषां जीवनं वीरं वायव्यां दिशि पूजयेत्॥

रक्तवर्णो महातेजः, रक्तस्त्रिग्दामभूषितः।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम्॥

वायवा याहि दर्शतेमे सोमा अरंकृता। तेषां पाहि श्रुधिहवम्॥इतिमन्त्रः॥

॥कुबेरस्य॥

आवाहयाम्यहं देवं, कुबेरं गदया युतम्।
नरासन समारूढं, उत्तरां दिशि पूजयेत्॥

कृष्ण वर्णो महातेजः, कृष्णस्त्रिग्दामभूषितः।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम्॥

सोमा धेनुं सामो अर्वन्तमाशुं सोमोवीरं कर्मण्यं ददाति।
साधन्यं वितथ्यं सभेयं पितृश्रवणं यो ददाशतस्मै॥

राजाधिराजाय प्रसह्य साधने नमो वयं वैश्रवणाय कुर्महे।
स मे कामान्कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु कुबेराय,

वैश्रवणाय महाराजाय वै नमो नमः॥इतिमन्त्रः॥

॥ईशानस्य॥

आवाहयाम्यहं देवं, ईशानं शूल धारिणम्।
शिखश्चन्द्रं वृषारूढं, ऐशान्यां दिशि पूजयेत्॥

शुक्लवर्णो महातेजः, शुक्लस्त्रिग्दामभूपितः।

बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम् ॥
ईशानं त्वा शुश्रुषमा वयं, धनानां धनपते।
गोमदग्ने अश्वद् भूरिपृष्ठं हिरण्यवदन्नवद्धेहिमह्यम् ॥इतिमन्त्रः ॥

॥ब्रह्मणः ॥

आवाहयाम्यहं देवं, ब्रह्माणं गायत्री पतिम्।
चतुरास्यं हंसयानम्, ऊर्ध्वायां दिशि पूजयेत् ॥
रक्तवर्णो महातेजः, रक्तस्त्रिग्दामभूषितः।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम् ॥
ब्रह्मज ज्ञानं प्रथमं पुरस्ताद् विसीमतः सुरुचो वे न आयुः।
सुबुध्न्या उपमायस्य विष्ठाः सतश्च योनिमऽसतश्च विवः ॥इतिमन्त्रः ॥

॥विष्णोः ॥

आवाहयाम्यहं देवं, विष्णुं त्रैलोक्य पूजितम्।
रमायुतं खगारढं, अधायां दिशि पूजयेत ॥
पीतवर्णो महातेजः, पीत स्त्रिग्दामभूषितः।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम् ॥
वषट्ते विष्ण आस आकृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम्।
वर्धन्तुत्वा सुष्टुतयो गिरामे यूयं पातु स्वस्तिभिः सदानः ॥इतिमन्त्रः ॥

॥अथात्रग्रहाणां तत्रादौसूर्यस्य ॥

आवाहयाम्यहं देवं, भानुं सर्व जगद्गुरुम्।
अरुणः सारथीयस्य, सप्ताश्वरथवाहनः ॥

रक्तवर्णो महातेजः, रक्त स्त्रिग्दामभूषितः ।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम् ॥
आकृष्णेन तेजसावर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्येन सविता रथेन देवो याति भुवनानि पश्यन् ॥इतिमन्त्रः ॥

॥चन्द्रस्य ॥

आवाहयाम्यहं देवं, चन्द्रं नक्षत्र नायकम् ।
शशशरीरालङ्कारं, प्रत्यक्षं लोक नायकम् ॥
शुक्ल वर्णो महातेजः, शुक्लस्त्रिग्दाम भूषितः ।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम् ॥
याते धामानि दिवि या पृथिव्यां या पर्वतेष्वोधीष्वप्सु ।
भिर्नो विश्वैः सुमना अहेळन् राजन्सोम प्रतिहव्याभाय ॥इतिमन्त्रः ॥

॥भौमस्य ॥

आवाहयाम्यहं देवं, भौमं मयूरवाहनम् ।
लोहिताङ्गं महौजस्कं, शत्रूणां च भयङ्करम् ॥
रक्तवर्णो महातेजः, रक्त स्त्रिग्दामभूषितः ।
बलिः पुष्पं चरुश्चैव धूपोऽयं प्रति गृह्यताम् ॥
अग्निर्मूर्धा विवः ककुत्पतिः पृथिव्या अयम् ।
अपां रेतांसि जिन्वति ॥इतिमन्त्रः ॥

॥बुधस्य ॥

आवाहयाम्यहं देवं, बुधं बुद्धि विवर्धनम् ।
सुवर्ण रथगंदीपं, सोमवंशस्य दुःखहम् ॥

पीतवर्णो महातेजः, पीतस्त्रिग्दामभूषितः।
बलिः पुष्पं चरुश्चैव, धूपौऽयं प्रतिगृह्यताम्॥
बोधस्वमे मघवन्वाचमेमां ते वसिष्ठो अर्चति प्रशस्तिम्।
इमा ब्रह्म साधमावे जुषस्व ॥इतिमन्त्रः॥

॥अथ गुरोः॥

आवाहयाम्यहं देवं, जीवं देवेन्द्र मन्त्रिणम्।
गजासनं देव पूज्यं, वाक्पतिं च ग्रहेश्वरम्॥
पीत वर्णो महातेजः, पीत स्त्रिग्दाम भूषितः।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम॥
बृहस्पते अतियदर्यो अर्हद् द्युमद् विभाति क्रतु मज्जनेषु।
यद्दीदयच्छ वसर्त प्रजात तदस्मासु द्रविणं देहि चित्रम्॥इतिमन्त्रः॥

॥भार्गवस्य॥

आवाहयाम्यहं देवं, भार्गवं दैत्य पूजितम्।
असुराणां गुरुं चैव, ग्रहाणामपि पूजितम्॥
शुक्लवर्णो महातेजः, शुक्लस्त्रिग्दाम भूषितः।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम्॥
अन्नात्परिस्त्रतो रसं ब्रह्मणा व्यपिबत् क्षत्रम्।
ऋतेन सत्यमिन्द्रयं विपानं शुक्रमन्धस्येन्द्रियस्येन्द्रियमिदं पयोऽमृतं मधु॥इतिमन्त्रः॥

॥शनैश्चरस्य ॥

आवाहयाम्यहं देवं, सूर्यपुत्रं शनैश्चरम्।
मेचक प्रति वर्णाभं, भूत संहार कारकम्॥

कृष्ण वर्णो महातेजः, कृष्णस्त्रिग्दामभूषितः।
बलिः पुष्पं चरुश्चैव, धूपोयं प्रतिगृह्यताम्॥

शन्नो देवीरभीष्टये आपो भवन्तुपीतये। शँय्योरभिस्त्रवन्तु नः ॥इतिमन्त्रः ॥

॥अथ राहोः ॥

आवाहयाम्यहं देवं, सैंहिकेयं महाबलिम्।
अबाहुमन्तरिक्षस्थं, देव दानव पूजितम्॥

हरिद्वर्णो महातेजः, हरित्स्त्रिग्दाम भूषितः।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम्॥

कयानश्चित्र आभूवदूती सदा वृधाः सखा।
कया शचिष्ठया वृता ॥इतिमन्त्रः ॥

॥केतुः ॥

आवाहयाम्हं देवं केतुं सर्वग्रहान्तकम्।
नीलजीमूतसङ्काशं, मृत्यु तुल्य पराक्रमम्॥

धूम्रवर्णो महातेजः, धूम्रस्त्रिग्दामभूषितः।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम्॥

केतुः कृण्वन्नकेतवे पेशोभर्या अपेशसे। समुषद्भिरजायथा ॥इतिमन्त्रः ॥

॥अथ ध्रुवस्य ॥

आवाहयाम्यहं देवं, ध्रुव राजं महाबलिम्।
ऋषीणां प्रवरं श्रेष्ठं, रुद्रैकादशवासिनाम् ॥
ग्रहचक्रस्थितं नित्यम्, उदीच्यां दिशि पूजयेत् ॥इतिमन्त्रः ॥
रक्तवर्णो महातेजः, रक्तस्त्रिग्दामभूषितः।
बलिः पुष्पंचरुश्चैव, धूपोऽयं प्रतिगृह्यताम् ॥
ध्रवौद्यौ ध्रुवा पृथिवी ध्रुवासः पर्वताइमे।
ध्रुवं विश्वमिदं जगद्ध्रुवो राजा विशामसि ॥इतिमन्त्रः ॥

॥अथागस्त्यस्य ॥

आवाहयाम्यहं देवं, अगस्त्यं देव पूजितम्।
उग्र रूपधरं नित्यं, रुद्ररूपमुनिस्तुतम् ॥
दक्षिणास्यां ज्वलनं च, जलधि चुल्लकी करम् ॥
पीतवर्णो महातेजः, पीतस्त्रिग्दामभूषितः।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम् ॥
अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः।
उभो वर्णा वृषिरुग्रः पुपोष सत्यादेवाप्वाशिपोजगाम् ॥इतिमन्त्रः ॥

॥अथ वास्तोष्पतेः ॥

आवाहयाम्यहं देवं, वास्तोष्पतिमति प्रियम्।
अधोमुख धराकाशं, दिक्षुसर्वासु व्यापकम्।
स्वेच्छा वर्ण महातेजः, स्वेच्छास्त्रिग्दामभूषितः।
बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम् ॥
अमीवहा वास्तोष्पते विश्वारुपाण्याविशत्। सखा सुशेव एधिः नः ॥

वास्तोष्पते प्रति जानी ह्यस्मान, स्वावेशे अनमीवो भवा नः ।
यत्त्वमेहि प्रति तन्नोजुषस्व शं नो भवद्विपदे शं चतुष्पदे ॥इतिमन्त्रः ॥

॥अथान्ते क्षेत्र पालानामाह्वानम् ॥

आवाहयाम्यहं देवं, क्षेत्रपालान्महाबलान् ।
दंष्ट्राकरालवदनां, जटामुकुटमण्डिताम् ॥

भूपाताल ख्वं व्याप्यत, संस्थितान्भक्त वत्सलान् ।
नानारूपधरान्देवान्, नानावर्णोपशोभितान् ॥

बलिः पुष्पं चरुश्चैव, धूपोऽयं प्रतिगृह्यताम् ॥
क्षेत्रस्य पतिना वयं हितेनेव जयामसि ।

गामश्वं पोषयित्वा सनो मृळाति दृशे ॥१ ॥
क्षेत्रस्य पतेः मधुमन्तमूर्मिन्धेनुरिव पयो अस्मासु धुक्ष्व ।

मधुश्च्युतं घृतमिव सुपूतमृतस्यानः पतयो मृळयन्तु ॥२ ॥
मधुमतीरोषधीर्द्यावा आपो मधुमान्नो भवन्त्वन्तरिक्षम् ।
क्षेत्रस्यपतिर्मधुमान्नो अस्त्वन्तरिष्यन्तो अन्वेनं चरेम् ॥इतिमन्त्रः ॥

॥अथात्रावाहनोपरान्त प्रार्थना ॥

भगवन् पुण्डरीकाक्ष, भक्तानुग्रहकारक ।
अस्मदीयानुरोधेन, सान्निध्यं कुरु नः प्रभो ॥

यवान्विकीर्य—बायें हाथ में रखे जौ के दाने दायें हाथ में लेकर इधर-उधर फैंके ।

॥अथ पाद्यम्॥

- नीचे लिखे संज्ञा पदों से 'शन्नोदेवी'० मन्त्र द्वारा जल को अभिमंत्रित करके पाद्य द्रव्य मिला कर देवताओं को पाद्य प्रदान करें। यथा :

शन्नोदेवीरभीष्टये आपो भवन्तु पीतये। शँय्योरभिस्त्रवन्तु नः॥

लाजाश्च कुङ्गमंचैव, सर्वोषधिसमन्वितम्। दर्भांकुर जलश्चैव पञ्चांङ्ग पाद्यलक्षणम्॥

महागणपतये, कुमाराय, श्रियै, सरस्वत्यै, लक्ष्म्यै, विश्वकर्मणे-द्वारदेवताभ्यः। प्रजापतये, ब्रह्मणे—कलशदेवताभ्यः। ब्रह्मविष्णुमहेश्वर देवताभ्यः। चतुर्वेदेश्वरायसानुचराय। (ऋतुपते नारायणाय), दुर्गायै, त्र्यम्बकाय, वरुणाय, यज्ञपुरुषाय, अग्निष्वातादिभ्यः। अग्नये, पुष्टिपतये, प्रजापतये, अर्यम्णे, गन्धर्वाय, त्र्यम्बकाय विवाहोद्वाहदेवताभ्यः। अग्नये, वायवे, सूर्याय, चन्द्रमसे, विष्णवे, प्रायश्चित्याग्देवताभ्यः। मेषादिभ्यो द्वादशलग्नेभ्यः। अश्विन्यादिभ्यो सप्तविंशति नक्षत्रेभ्यः। भगवते वासुदेवाय (सङ्कर्षणाय, प्रद्युम्नाय, अनिरुद्धाय, सत्याय, पुरुपाय, अच्युताय, माधवाय, गोविंदाय, सहस्त्रनाम्ने बिष्णवे) लक्ष्मी सहिताय नारायणाय। भगवते भवायदेवाय (शर्वायदेवाय, रुद्राय दे०, पशुपतयेदे०, उग्रायदे०, भीमायदे०, महादे०, ईशानायदे०) उमा सहिताय शिवाय, पार्वती सहिताय परमेश्वराय। भगवते विनायकाय (एकदन्ताय, कृष्णापङ्गिलाय, गजाननाय, लम्बोदराय, भालचन्द्राय, हरेम्बाय, आखुरथाय, विघ्नेशाय) वल्लभा सहिताय श्रीमहागणेशाय। ॐ ह्रां ह्रीं सः सूर्याय (सप्ताश्वाय, अनश्वाय, एकाश्वाय, नीलाश्वाय, प्रत्यक्षदेवाय, परमार्थसाराय, तेजोरुपाय) प्रभासहिताय आदित्याय। भगवत्यै अमायै (कामायौ, चारवङ्गयै, टङ्कधारिण्यै, तारायै, पार्वत्यै, यक्षिण्यै, श्री शारिका भगवत्यै, श्री शारदा भ०, श्री महाराज्ञी भ०, श्री ज्वाला भ० वैखरी भ०, वितस्ता भ०, गंगा भ० यमुना भ०, कालिका भ०, सिद्धलक्ष्म्यै, महालक्ष्म्यै) सहस्त्रनाम्न्यै भवान्यै। विष्णु पञ्चायतन देवताभ्यः। इन्द्राय, अग्नये, यमाय, नैर्ऋत्यै, वरुणाय, वायवे, कुबेराय, ईशानाय, ब्रह्मणे, विष्णवे-दशदिक्पालदेवताभ्यः। अनन्तादिभ्योऽष्टकुलनागदेवताभ्यः। आदित्यादिभ्यः एकादशग्रहेभ्यः। मेषादिभ्यो द्वादशलग्नेभ्यः। अश्विन्यादिभ्यो सप्तविंशति नक्षत्रेभ्यः। अग्न्यादित्याभ्यां, वरुणचन्द्रमसोभ्यां, कुमार भौमाभ्यां, विष्णुबुधाभ्यां, इन्द्रबृहस्पतिभ्यां, सरस्वती शुक्राभ्यां, प्रजापतिशनैश्चराभ्यां, गणपितराहुभ्यां रुद्रकेतुभ्यां, ब्रह्मध्रुवाभ्यां, अनन्तागस्त्याभ्याम्। ब्रह्मणे, कूर्माय, ध्रुवाय, अनन्ताय, हरये, लक्ष्म्यै, कमलाय, शिख्यादिभ्यः-पञ्चचत्वारिंषद् वास्तोष्पति देवताभ्यः। गौर्यादिभ्यः मातृभ्यः, अखण्ड ब्रह्माण्डदेवताभ्यः, हेरुकादिभ्यः, वटुकादिभ्यः, क्षेत्रेशदेवताभ्योः (वरकहे) आत्मोद्वाहनिमितं (यजमान कहे) कन्योद्वाहनिमितं (दोनों कहें) इदं पाद्यं नमः ॥पाद्यशेषं निवार्येत्॥

॥अथोर्घ्यम्॥

ॐ शन्नोदेवीरभीष्टये आपो भवन्तु पीतये। शँय्योरभिस्त्रवन्तुतः॥
आपः क्षीरं कुशाग्राणि घृतं च दधितण्डुला। यवाः सिद्धार्थकाश्चैवह्यर्घ्यमष्टाङ्गमुच्यते॥

● उपर्युक्त 'शन्नोदेवी०' मन्त्रद्वाराप्रणीतपात्रस्थ जल को अभिमंत्रित कर, उसमें अर्ध्यद्रव्य-पानी, दूध, कुशा, घी, दही, चावल, जौ और तिल अथवा सरसों मिलाकर देवतार्थ अर्ध्यार्पण करें। यथा : **महागणपते, कुमार, श्री, सरस्वती, लक्ष्मी, विश्वकर्मन-द्वारदेताः। प्रजापते ब्रह्मन्- कलशदेवताः। ब्रह्म विष्णु महेश्वर देवत्ताः। चतुर्वेदेश्वरसानुचरा। (ऋतुपति नारायण) , दुर्गे, त्र्यम्बक, वरुण-यज्ञपुरुष। अग्नि, पुष्टिपति, प्रजापति, अर्यम्ण, गन्धर्व, त्र्यम्बक विवाहोद्वाहदेवताः। अग्नि, वायु, सूर्य, चन्द्रमस, विष्णु-प्रायश्चितयागदेवताः। मेषादयोः द्वादशलग्नानि। अश्विन्यादयोः सप्तविंशति नक्षत्राणि। भगवान् वासुदेवादीन् विष्णु पञ्चायतन देवताः। इन्द्र, अग्ने, यम, नैर्ऋते, वायो, कुबेर, ईशान, ब्रह्मन, विष्णो—दशदिक्पाल देवताः। इन्द्रवज्रहस्त, अग्ने-शक्तिहस्त, यमदण्डहस्त, नैर्ऋते खड्गहस्त, वरुणपाशहस्त, वायो ध्वजहस्त, कुबेर गदाहस्त, ईशान त्रिशूलहस्त, ब्रह्मन् पद्महस्त, विष्णोचक्रहस्त। अनन्ताद्योऽष्टकुलनागदेवताः। अगन्यादित्यौ, वरुणचन्द्रमसौ, कुमारभौमौ, विष्णु बुधौ, इन्द्र बृहस्पत्यौ, सरस्वती शुक्रौ, प्रजापति शैनेश्चरौ, गणपति राहु, रुद्रकेतु, ब्रह्मध्रुवौ, अनन्तागस्त्यौ। ब्रह्मन्, कूर्म, ध्रुव, अनन्त, हरे, लक्ष्मीः, कमले, शिख्यादयाः पञ्चचत्वारिंशद्वास्तोषपति देवताः। दुर्गादयोः मातरः, श्रीर्रादयोः मातरः, ॐ भूर्देवताः, ॐ भुवोर्दे०, ॐ स्वर्दे०, ॐ भूभुवः स्वर्दै०, अखण्ड ब्रह्माण्ड देवताः, महागायत्रि, सावित्रि, सरस्वति, हेरुकादयो, वटुकादयाः** (वरकहे) **आत्मो-द्वाह निमितं** (यजमानकहे) **कन्योद्वाह निमितं** (दोनों कहे) **इदमोऽर्ध्यं नमः॥**

॥अथ गन्धम्॥ गन्धद्रव्यभेंट करे॥

महागणपतये, कुमाराय, श्रियै, सरस्वत्यै, लक्ष्म्यै, विश्वकर्मणे-द्वारदेवताभ्यः। प्रजापतये, ब्रह्मणे-कलशदेवताभ्यः। ब्रह्मविष्णुमहेश्वरदेवताभ्यः। चतुर्वेदेश्वराय सानुचराय (ऋतुपतयेनारायणाय), दुर्गायै, त्र्यम्बकाय, वरुणाय, यज्ञ पुरुषाय, अग्निष्वातादिभ्यः। अग्नये, पुष्टिपतये, प्रजापतये, अर्यम्णे, गन्धर्वाय, त्र्यम्बकाय-विवाहोद्वाह देवताभ्यः। अग्नये, वायवे, सूर्याय, चन्द्रमसे, विष्णवे-प्रायश्चितयागदेवताभ्यः। मेषादिभ्यो द्वादश लग्नेभ्यः। अश्विन्यादिभ्यो सप्तविंशति नक्षत्रेभ्यः। भगवते वासुदेवाय, भगवते भवायदेवाय। भगवते विनायकाय। ॐ ह्रां ह्रीं सः सूर्याय। विष्णु पञ्चायतन देवताभ्यः। इन्द्रादिभ्यो दशदिक्पाल देवताभ्यः। अनन्तादिभ्योऽष्टकुलनागदेवताभ्यः। आदित्यादिभ्यः एकादशग्रहेभ्यः। ब्राह्मयादिभ्यो मातृभ्यः। अखण्डब्रह्माण्ड देवताभ्यः, हेरुकादिभ्यो वटुकादिभ्यः, क्षत्रेशदेवताभ्यः **(वरकहे)** आत्मोद्वाह निमितं **(यजमान कहे)** कन्योद्वाह निमितं **(दोनों कहें)** समालभनं गन्धो नमः। (गन्धलेपं निवार्येत्) एवं अर्घोनमः पुष्पं नमः॥

॥अथ धूपदीप सङ्कल्पः॥

यत्रास्ति माता न पिता न बन्धु, र्भ्रातापि नो यत्र सुहृज्जनश्च।
न ज्ञायते यत्र दिनं न रात्रि स्तत्रापि दीपं शरणे प्रपद्ये॥

ॐ तत्सत् अद्य तावत् मासोत्तमे महामांगल्यप्रदेऽमुकमासेऽमुकपक्षेऽमुकतिथौऽमुकवासरे महागणपतये, कुमाराय, श्रियै, सरस्वत्यै, लक्ष्म्यै, विश्वकर्मणे-द्वारदेवताभ्यः प्रजापते ब्रह्मणे-कलश देवताभ्यः। अग्नये, पुष्टिपतये, प्रजापतये। अर्यम्णे, गन्धर्वाय, त्र्यम्बकाय,-विवाहोद्वाहदेवताभ्यः। अग्नये, वायवे, सूर्याय, चन्द्रमसे, विष्णवे-प्रायश्चितयागदेवताभ्यः। मेषादिभ्यो द्वादशलग्नेभ्यः। अश्विन्यादिभ्यः सप्त-विंशाति नक्षत्रेभ्यः। अनन्तादिभ्यो विष्णुपञ्चायतनदेवताभ्यः। इन्द्रादिभ्यो दशदिक्पाल देवताभ्यः। अनन्तादिभ्योऽष्टकुलनाग देवताभ्यः। आदित्यादिभ्यः एकादशग्रहेभ्यः अखण्ड ब्रह्माण्डदेवताभ्यः। हेरुकादिभ्यो वटकादिभ्यः, क्षेत्रेशदेवताभ्यो (वरकहे) आत्मोद्वाह निमितं (यजमान कहे) कन्योद्वाह निमितं (दोनों कहें) धूपदीपसङ्कल्पात् सिद्धिरस्तु धूपोनमः दीपं नमः ॥ (पुनः) महागणपतेः, कुमारस्य, श्रियः, सरस्वत्याः, लक्ष्म्याः, विश्वकर्मणः-द्वारदेवतानाम्। चतुर्वेदेश्वरस्यसानुचरस्य। (ऋतु पतेः नारायणस्य) , अर्यम्णस्य, गन्धर्वस्य, त्र्यम्बकस्य-विवाहोद्वाहदेवतानाम्। अग्नेः, वायोः, सूर्यस्य, चन्द्रमस्, विष्णोः-प्रायश्चितयाग देवतानाम्। मेषादिनां द्वादश लग्नानाम्। अश्विन्यादिनां सप्तविंशति नक्षत्राणाम्। वासुदेवादि विष्णु-पञ्चायतन देवतानाम्। इन्द्रादि दशदिक्पालानाम्। ॐ भूर्देवतानाम्, ॐ भूवेर्दिवतानां, ॐ स्वर्देवतानां, अखण्ड ब्रह्माण्डदे-वतानां, महागायत्र्याः, सावित्र्याः, सरस्वत्याः, हेरुकादिनां वटुकादिनामऽर्ध्यदानाद्यर्चन् विधिः सर्वः परिपूर्णमऽस्तु। एवमऽस्तु। अन्नं नमः २ आज्यं नमः २ अद्यदिने अद्य यथा सङ्कल्पितकार्ये सिद्धिरस्तु ॥ (वर यजमान हाथ जोड़ प्रार्थना करें) अन्नहीनं, क्रियाहीनं विधिहीनं, द्रव्यहीनं, मन्त्रीहीनं यत्कृतं तत्सर्वमऽच्छिद्रं सम्पूर्णमऽस्तु (आचार्य कहे) एवं अस्तु ॥

॥आपोशानमाचमनीयम्॥

- अर्घ पात्र में जल लेकर :

शन्नो देवीरभीष्टये आपो भवन्तु पीतये। शँय्यो रभिस्रवन्तु नः ॥

महागणपतये, कुमाराय, श्रिये, सरस्वत्यै, लक्ष्म्यै, विश्वकर्मणे-द्वारदेवताभ्यः। अग्नेय, पुष्टिपतये, प्रजापतये, अर्यम्णे, गन्धर्वाय त्रयम्बकाय-विवाहोद्वाह देवताभ्यः। अग्नये, वायवे, सूर्याय, चन्द्रमसे-प्रायश्चितयागदेवताभ्यः। प्रजापतये, ब्रह्मणे-कलशदेवताभ्यः। ब्रह्मविष्णु महेश्वरदेवताभ्यः। मेषादिभ्यो द्वादश लग्नेभ्यः। अश्वन्यादिभ्यः सप्तविंशति नक्षत्रेभ्यः। वासुदेवादिभ्यो विष्णु पञ्चायतन देवताभ्यः। इन्द्रादिभ्यो दशदिक्पालदेवताभ्यः। अनन्तादिभ्यो मातृभ्यः, हेरुकादिभ्यो वटुकादिभ्यः, क्षेत्रेशदेवताभ्योः (वर कहे) आत्मोद्वाहनिमितं (यजमान कहे) कन्योद्वाह निमितं (दोनों कहें) आपो शानं नमः आचमनीयं नमः ॥

(पुनः)

शन्नोदेवीरभीष्टये आपो भवन्तु पीतये। शँय्यो रभिस्रवन्तु नः ॥

महागणपतये० (शेष उपर्युक्त) . . . क्षेत्रेशदेवताभ्योः दक्षिणायै तिलहिरण्य-रजत निष्कर्णन्ददानि ॥ पुनः महागणपतये (शेष उपर्युक्त) क्षेत्रेशदेवताभ्यः सदक्षिणान्नेन प्रीयन्तां प्रीताः सन्तु ॥ (आचार्यकहे)— एवमऽस्तु ॥ (अर्घपात्र से जल निर्माल्य में गिरायें)

॥अथाभिषेकम् ॥

अभिषेक का अर्थ है— छिड़कना, पानी की छींटे देना, राजा वा देव-मूर्ति स्थापन के मङ्गलमय अवसर पर जल सिञ्चन द्वारा प्रतिष्ठापनादि । इस स्थल पर वर एवं कन्या का अभिषेक करने का विधान है, जो यथार्थ है । एककारण यह है कि विवाह संस्कार के अवसर पर वर को विष्णुरूप तथा कन्या को लक्ष्मीरूपा संज्ञा दी जाती है । दूसराकारण—वेद मन्त्रों तथा मांगलिक द्रव्यों से मिश्रित जल द्वारा किया जाने वाला अभिषेक मानव में श्रद्धा को उत्पन्न करने वाला तथा आलस्य एवं निद्रा को दूर करने का एक उत्तम साधन है । यह आवश्यक नहीं कि अभिषेक प्रकरण में आये सारे के सारे मन्त्र पढ़कर अभिषेक क्रिया सम्पन्न की जाये वरन् समय की सुविधा अनुसार— सब अथवा कुछ मन्त्रों अथवा 'या आपोदिव्याः०' 'अभित्वावचसा०' आदि केवल दो मन्त्रों से ही अभिषेक हो सकता है ।।इत्यलम् ॥

- **सर्वोषधि जाफलयुते समजलपात्रे-संव्वः सृजामीतिकृत्वा वराभिषेकम् ।
  सर्वगन्धैः फलोत्तरैः सशिरस्कं स्नापयित्वा आहतेनवाससा प्रच्छादय ॥**

भाषा : सर्वोषधियुक्त-जायफल या सुपारी युक्त शुद्ध जल-प्रणीत पात्र में 'संव्वः सृजामिं आदि मन्त्र युग्म से पुष्प डाल कर, अहत अर्थात नया वस्त्र लेकर और उससे ढककर, शिरस्त्राण (सेहरा आदि) धारण किये हुए वर को कथित सुगन्धित युक्त जल से, वर के हाथ में जायफल सुपारी देकर निम्नलिखित मन्त्रों से अभिषेक करें । यथा—

(१)

साविर्हिदिव प्रथमाय पित्रे, वर्ष्माणमस्मै वरिमाणमस्मै ।
अथाऽस्मभ्यं सवितुर्वार्याणि, दिवे दिव आसुवा भूरि पश्वः ॥१॥
भूतौभूतेषु चरति प्रविष्टः, स भूतानामधिपतिर्बभूव ।
तस्यमृत्युश्चरति राजसूयं, स राज्या राज्यमनु मन्यतामिदम् ॥२॥

येभिः शिल्पैः पपृथानाम हृदयेभिर्द्यामभ्यपिं शत्रजापतिः।
येभिर्वाचं विश्वरूपेभिरख्यं, स्तेनेममग्न इह वर्चसा समंग्धि ॥३ ॥
ये भिरादित्यस्तपति प्रकेतुभि, र्ये भिः सूर्यो ददृशे चित्रभानुः।
येभिर्वाचं पुष्कले भिख्ययं, स्तेन मग्न इह वर्चसा समंग्धि ॥४ ॥
आयम्भातु शवसा पञ्चकृष्टि, रिन्द्र इवज्येष्ठे भवतु प्रजानाम्।
अस्मिन्नस्तु पुष्कलं चित्रभानु, अयं पृणातु रजसो विमानम् ॥५ ॥
यत्ते शिल्पं कश्यप रोचनावद्, इन्द्रिया वत्पुष्कलं चित्रंभानुः।
यस्मिन्सूर्यो अपिताः सप्त साकं, तस्मिन राजानमधिविश्रेयमम् ॥६ ॥
व्याघ्रो वै व्याघ्रे अधिविक्रमस्त दिशो महीः।
विशस्त्वा सर्वा वांछन्त्वापो दिव्याः पयस्वतीः ॥७ ॥

- या आपो दिव्याः पयसा संबभूवु र्याअन्तरिक्ष्या उत पार्थिवासः।
  तासां त्वा सर्वासां रुचिभिपिञ्चामि वर्चसा ॥८ ॥

- अभित्वा वर्चसा सिचं यज्ञेन पयसा सह।
  यथासो मित्रवर्धनस्तथा त्वा सविता करत् ॥९ ॥
  इन्द्रं विश्वा अविवृधत्समुद्रं व्यचसं गिरा।
  रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥१० ॥

(२)

अभिप्रेहि वीर्यस्वोग्राश्चिता सपत्नहा।
आतिष्ठमित्र वर्धनस्तुभ्यं देवा अधिब्रुतन् ॥१ ॥
आतिष्ठवृत्र हन् रथं युक्ताते ब्रह्मणा हरी।
अर्वाचीनां सुतेमनो ग्रावा कृणोतु वग्नुना ॥२ ॥

आतिष्ठन्तं परिविश्वे अभूषं श्रियो वसानश्चरति सुरोचिः।
महत्तदस्यासुरस्य नामा विश्वरूपो अमृतानि तस्थौ ॥३ ॥

अनुत्विन्द्रो मदत्वऽनु बृहस्पतिरऽनु सामो अन्वग्निरावीत्।
अनुत्वा विश्वे अवन्तु देवाः सप्तराजानोय उदाभिषिक्ताः ॥४ ॥

अनुत्वा मित्रा वरुणा इहावातामनु द्यावा पृथिवी ओषधीभिः।
सूर्योऽहोभिरनुत्वाऽवतु चन्द्रमा नक्षत्रैरनु त्वावीत् ॥५ ॥

द्यौश्चत्वा पृथिवी च प्रचेतसा यज्ञो बृहद्दक्षिणात्वा पिपर्तु।
अनु स्वधा चिकिते सोमो अग्निरनु त्वावतु सविता सवेन ॥६ ॥

एना व्याघ्रं परिषस्वजानं सिंह हिन्वन्ति महते धनाय।
मन्मृज्यन्ते द्वीपिन प्स्वन्तर रुषं नन्दुभ्यस्तस्थिवांसम् ॥७ ॥

(३)

अपांय्यो द्रवणे रहस्तमहमस्मा अमुष्मा अमुष्यायणाय तेज से ब्रह्मवर्चसे गृहणमि ॥
अपांय्यो ऊर्मो रसस्तमहमस्मा अमुष्मा अमुष्यायणाय ओजसे क्षत्राय गृहणमि ॥
अपांय्यो मध्ये रसस्तमहमस्मा अमुष्मा अमुष्यायणाय प्रजायै पुष्ट्यै गृहणमि ॥
अपांय्यो यज्ञिया तनूस्तमहमस्मा अमुष्मा अमुष्यायणाय आयुषे दीर्घायुत्वाय गृहणामि ॥

- यहां उक्त वाक्यों में 'अमुष्मै' पद के स्थान पर वर का नाम च० वि० में लेना चाहिए।

(४)

रथे अक्षेषु वृषभस्य वाजे, वाते पजन्ये वरुणस्य शुष्मे।
इन्द्रं या देवी सुभगा जज्ञान, सेयमागाद् वर्चसा संविदाना ॥१ ॥

या हस्तिनि द्वीपिनि या हिरण्ये, गोष्वश्वेषु पुरुषेष्वन्तः।
इंद्रं या देवी सुभगा जजान, सेयमागाद् वर्च सा संविदाना ॥२ ॥

सिंहे व्याघ्र उतया पृदाकौ, त्विषिरग्नौ ब्रह्मणे सूर्ये या।
इन्द्रं या देवी सुभगा जजान, सेयमागाद वर्चसा संविदाना ॥३ ॥
या राजन्ये दुन्दुभा वायताया, गश्वस्य क्रन्वे पुरुषस्य मायौ।
इन्द्रं या देवी सुभगाजजान, सेयमागाद वर्चसा संविदाना ॥४ ॥

(अथर्व का० ६/सू० ३८/मं० ३/२/१/४)

(५)

राळऽसि विराळसि सम्राळऽसि स्वराळऽसि,
इन्द्राय त्वा मधुमते मधुमन्तं श्रीणामि।
इन्द्राय त्वोजस्वत ओजस्वन्तं श्रीणामि,
इन्द्रायत्वा पयस्वते पयस्वन्तं श्रीणामि।
इन्द्राय त्वाऽयुष्मत आयुष्मन्तं श्रीणामि ॥
वर्चोसि तन्मे नियच्छ तत्ते नियच्छामि,
ओजोसि तन्मेनियच्छ तत्ते नियच्छामि।
पयोसि तन्मे नियच्छ तत्ते नियच्छामि,
आयुरसि तन्मे नियच्छ तत्ते नियच्छामि ॥
वर्चस्वदऽस्तु मे मुखं वर्चस्वच्छिरो अस्तु में,
वर्चस्वान्विश्वतः प्रत्यङ् वर्चसा संपिपृग्धि मा।
ओजस्वदऽस्तु में मुखं ओजस्वच्छिरो अस्तु,
ओजस्वान्विश्वतः प्रत्यङ् ओजसा संपिपृग्धिमा ॥
पयस्वदऽस्तु में मुखं पयस्वच्छिरो अस्तु में,
पयस्वन्विश्वतः प्रत्यङ् पयसा संपिपृग्धिमा ॥
आयुष्मदऽस्तु में मुखं आयुष्मच्छिरो अस्तुमे,
आयुष्मन्विश्वतः प्रत्यङ् पयसा संपिपृग्धिमा ॥

(६)

इदमहं गायत्रेणच्छन्दसा, त्रिवृतास्तोमेन रथान्तरेण,
साम्नाग्निना देवतया तेजसते वर्च आददेऽसौ।

इदमहं त्रैष्टुभेनच्छन्दसा, पञ्चदशेन स्तोमेन बृहता।
साम्नेन्द्रेण देवतयोजस्ते क्षत्रमाददेऽसौ।

इदमहं जागतेन छन्दसा, सप्तदशेन स्तोमेन वैरूपेण,
साम्ना विश्वे देवैर्देवतया प्रजां ते पुष्टिमाददेऽसौ।

इदमहं अनुष्टुभेन छन्दसैकविंशेन स्तोमेन वैराजेन,
साम्ना प्रजापतिना देवतयाऽयुस्ते दीर्घायुत्वामाददेऽसौ॥

(७)

ॐ इममग्न आयुषे वर्चसे कृधि तिग्ममोजो वरुण संशिशाधि।
माते वास्मा अदिते शर्मयच्छ विश्वेदेवा जरदष्टिर्यथासत्॥१॥

विश्वकर्मा विश्वदेवो विश्वजिद् विश्वदर्शितः।
ते त्वा घृतस्य धारया श्रेष्ठ्याय समसूपत॥२॥

यतो वातो मनोजवा यतः क्षरन्ति सिन्धवः।
तासां त्वा सर्वासां रुचा अभिषिञ्चामि वर्चसा॥३॥

अमित्वा वर्चसाऽसिचं यज्ञेन पयसा सह।
यथासो मित्र वर्धनस्तथा त्वा सविता करत्॥४॥

इन्द्रं विश्वा अवीवृधत् समुद्रं व्यच सङ्गिरः।
रथीतमं रथीनां वाजानां सत्पतिं पतिम्॥५॥

(८)

अपां यो द्रवेण रसस्तेनाहामिममऽमुमऽमुष्यायन—
मऽमुष्याः पुत्रं तेजसे ब्रह्मवर्चसायाभिषिञ्चामि ।
अपां य ऊर्मो रसस्तेनाहमिममऽमुमऽमुष्यायन—
मऽमुष्याः पुत्रमौजसे क्षत्रायाभिषिञ्चामि ।
अपां यो मध्ये रसस्तेनाहमिममऽमुमऽमुष्यायन—
मऽमुष्याः पुत्रं प्रजायै पुष्ट्यायाभिषिञ्चामि ।
अपां या यज्ञिया तनूस्तयाहमिममऽमुमऽमुष्यायन—
मऽमुष्याः पुत्रमायुषे दीर्घायुत्वायाभिषिञ्चामि ॥

(९)

ॐ निषसाद घृतवतो वरुणः पस्त्यास्वः सम्राज्याय सुक्रतुः ।
देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां,
अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिसिञ्चामि ॥१ ॥
देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां
सरस्वत्या भैषज्येन वीर्यायान् नाद्यायाभिषिञ्चामि ॥२ ॥
देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां,
इन्द्रस्येन्द्रियेण बलाय श्रियैयशसे अभिषिञ्चामि ॥३ ॥

(१०)

कोऽसि कोनामासि कस्मैत्वा कायत्वा सुश्लोकाः सुमंगलाः सत्यराजान्,
रायेजातः सहसे वृद्धः क्षेत्राणां क्षत्रभृत्तमोवयोधाः,
महान्महित्वा संस्तम्भेक्षेत्रे राष्ट्रे च जागृहि ॥१ ॥

वरस्यतिलकं मार्जनंच

● तिलकं सशकुनम् : निम्नोक्तमन्त्रों से आचार्य वर को तिलक लगाये तथा दाहिनी कलाई में रक्षा सूत्र बान्धे । यथाः

नवकृत्व इन्द्रो राजा सविता त्वामभिषिञ्चतु।
मित्रोवायुर्वृहस्पति र्धाताक्षत्रं दधातु ते ।।१ ।।

अदितिस्त्वा सुष्वतु राजन्महते क्षत्राय महते ज्यैष्ठ्याय महते।
राज्याय महते ज्यानराजाय महते विश्वस्य भुवनस्याधिपत्याय समस्त्वाग्ने ।।२ ।।

पुनमार्जनं वरस्य : ॐ देवस्य त्वा सवितुः प्रसर्वेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां, सरस्वत्या वाचा यन्तुर्यन्त्रेणेममुमऽमुष्यायणममुष्याः, पुत्रमग्ने सम्राज्येनाभिषिञ्चामि इन्द्रस्य सम्राज्येनाभिषिञ्चामि ।।१ ।।

● **अथ वध्व :** वधू के हाथ में सुपारी देकर निम्न मन्त्रों से अभिषेक करें :

ॐ चतुश्शिखण्डा युवतिः सुपत्नी विनीयमाना सौभगाय।
धृतं दुहानामदितिर्जनाय सामे ध्वक्ष्व सर्वान् भूतिकामान् ।।१ ।।
उच्छ्रयस्व वनस्पतेर्वर्ष्मन् पृथिव्यामधि, समिती मीयमानो वर्चोधा यज्ञवाहसे।
समिद्धस्यश्रयमाणः पुरस्ताद् ब्रह्मवन्वाना अजरं सुवीरम्।
आरे अस्मद मति बाधमान उछ्रयस्व महते सौभगाय ।।२ ।।
हिङ्कृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसाऽभ्यागात्।
दुहामश्विभ्यां पयो अध्न्येयं स वर्धतां महते सौभगाय ।।३ ।।

● **सशकुनानयनं तिलकम् :** आचार्य निम्नमन्त्रों से वधू को तिलक तथा वाम कलाई में रक्षा सूत्र बान्धेः

यस्मैत्वां सुकृतो जातवेदा, उलोंकमग्ने कृणवस्योनम् ।
अश्विनं सुपुत्रिणं वीरवन्तं, गोमन्तं रयिन्नशते स्वस्ति ॥

यजमानाय : निम्नमन्त्र से यजमान को हाथ में नारियल देकर अभिषेक करें :

ऋ० ८/ ३१/ १५/१६/१७/१८

मक्षु देव वतो रथशूरो पृत्स्वका स्वचित् ।
देवानां य इन्नमनो यजमान इयक्षत्यभीदयज्वनो भुवन् ॥१ ॥
नकिष्टं कर्मणा नशन्न प्रायोशन्नयोषति ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवन् ॥२ ॥
असदत्र स्ववीर्यमुत त्यदश्वश्व्यम् ।
देवानां य इन्ममनो यजमान न इयक्षत्यमीदयज्वनो भुवन् ॥३ ॥
न यजमान ऋष्यसि न सोन्वान न देवयोः ।
देवानां य इन्मनो यजमान इयक्षत्यभीदय ज्वनो भुवन् ॥४ ॥

धनञ्जयः सहमानः पृतन्यो अग्नि एष ऊर्जं यजमानाय देहि ॥५ ॥
विश्वा पृतना सहमानः सहोभिरन्नं नो देहि बहुधाविरूपं यत्रजा अनुजीव कामाः ॥६ ॥ ● **यजमान तिलकं सशकुनं :** निम्नमन्त्र से यजमान को तिलक करें तथा रक्षा सूत्र बान्धें ।

यानि दक्षिणानिच्छन्दींषितान्युत्तराणि कुर्याद् यजमानो,
लोके एतानि यानि दक्षिणानि भ्रातृव्यालोके ।
उत्तराण्युत्तरमेव यजमानोऽयजमानाद्,
भ्रातृव्यात्करोत्युत्तरो हि यजमानोऽयजमानात् ॥

॥इत्याभिषेक प्रकरणम् ॥

॥कन्यादान प्रकरणम् ॥

॥ज्ञातव्यविषय ॥

मन्त्री गुरु अरु वैद्य जो, प्रिय बोलहिं भय आस ।
राज धर्म तन तीन कर, होय वेगही नास ॥

प्रस्तुत प्रकरण को गति देने से पूर्व हमें किसी सुकवि का उपर्युक्त दोहा स्मरण हो आया । प्रायः देखने में आता है कि इस मंगलमय अवसर पर मदिरापान के दुर्व्यसन के फलस्वरूप लग्नसमय की उपेक्षा उत्तरोत्तर बढ़ती जा रही है, जिस कारण विवाहोपरान्त प्रतिकूल परिणाम निकलते हैं । हमारा संकेत साधारणतया दोनों पक्षों की ओर किन्तु विशेष रूप से वर पक्ष की ओर है । लग्न जांचने वर पक्ष ही जाता है और असावधानी अर्थात् लग्न समय के प्रति अवहेलना भी प्रायः इसी पक्ष की ओर से बरती जाती है जो अवांच्छनीय और हानिकारक है । महर्षि वसिष्ठ का कथन है : कश्चिद् गृहाश्रम समो न परोऽस्ति धर्मः ।
सोऽपिस्थित सगुणवृत्तयुतामङ्गनासु ॥ उद्वाह लग्न वशतो गुणयुतलब्धितासां तथाविध सुलग्नमतः प्रवच्मि ॥ विस्तार में न जाते हुए संक्षेप में— 'विवाह संस्कार कर्म' यदि लग्न समय विचारानुरूप सम्पन्न किया जावे तो स्त्री के गुणों की उत्तरोत्तर सद्वृद्धि होती है ॥ हमने अपना कर्त्तव्य (धर्म) पूरा किया आगे वर पक्ष की इच्छा और सर्वोपरि ईश्वरेच्छाबलीयसीतिशम् ॥

॥कन्यादान माहात्म्यम् ॥

अश्वमेध सहस्रस्य, वाजपेये शतस्य च ।
एक कन्या प्रदानेन, फलमाप्नोतिनः कलौ ॥१ ॥

भाषा : एक हज़ार अश्वमेधयज्ञ तथा एक सौ वाजपेय यज्ञ करने का जो फल होता है, वह फल कलियुग में एक कन्यादान करने से स्वतः प्राप्त होता है ॥१ ॥ (सूतसंहितातः)

अन्य चः भूमिदानं वृषोत्सर्गो, दानं गज सुवर्णयोः।
उभय तो वदना गौश्च, तुलाया दानमुत्तमम् ॥१ ॥
कन्यादानं जीवदानं, शरणागत पालनम्।
वेददानं महाराज, महादानानि वैदश ॥
तत्रापि च महाबाहो, कन्यादानमुत्तमम्।
कन्यादानात्परंदानं, न भूतं न भविष्यति ॥मार्तण्डतः ॥

भाषा : [१]भूमिदान, [२]वृषोत्सर्ग (मृत पुरुषके नाम पर दागकर सांड छोड़ना), [३]हाथीदान, [४]स्वर्ण, उभयतो [५]मुखीगाय, [६]कन्यादान, [८]जीवनदान, [९]शरणागत रक्षा और [१०]वेददान— यह दस महादान हैं ॥१ ॥ उक्त दस महादानों में कन्यादान सर्वोत्तम दान है। कन्यादान से परम दान न हुआ है और न होगा ॥

'विधिवत् कन्यादानमश्वमेध समं कलौ' ॥श्री गोविन्दराज ॥

भाषा : कलियुग में विधिपूर्वक किया जाने वाला कन्यादान अन्य युगों के अश्वमेध के समान है ॥

॥ पाणिग्रहणम् ॥

॥ अत्रादौ कन्यादान सङ्कल्प निमितं शंख पूजनम् ॥

- **सव्येन :** दायें यज्ञोपवीत करके, प्रणीत पात्र में जल, तिल, अक्षत, गन्ध तथा विष्टुर डालकर निम्नमन्त्र युग्म से तीन पुष्प डालें । यथा :

संव्वा सृजामि हृदयं संसृष्टं मनो अस्तुवः ।
संसृष्टा तन्वः सन्तु वः संसृष्टा प्राणो अस्तुवः ॥१ ॥

संय्यावः प्रियास्तनवः सम्प्रिया हृदयानिवः ।
आत्मा वो अस्तु संप्रिया संप्रियास्तनवोमम ॥२ ॥

- पुनः अभिमन्त्रितजल से मार्जन करते हुए शंख को जीवादान दें :

अश्विनोः प्राणस्तौ ते प्राणं दत्तान तेन जीव,
मित्रः वरुणयोः प्राणस्तौते प्राणं दत्तां तेनजीव,

बृहस्पते प्राण स ते प्राणं दत्तां तेन जीव ॥

- पुनः अक्षत समेत दो दर्भकाण्ड हाथ में लेकर शंख पूजार्थ पृच्छा सम्पादनः ॐ गायत्र्यै नमः ॐ भूर्भुवः स्वः, तत्सवितुर्वरेण्यं, भर्गोदेवस्य धीमहि धियो यो नः प्रचोदयात् ॥३ ॥ ॐ तत्सदद्यतावत मासोत्तमेऽमुकमासेऽमुकपक्षेऽमुकतिथौऽमुकवासरे शंखस्य पाञ्चजनयस्य (यजमान कहे) कन्यादान निमितं पूजनमर्चामहं करिष्ये (आचार्य कहे) ॐ कुरुष्व ।

शन्नोदेवीरभिष्टये आपो भवन्तुपीतये। शँय्यो रभिस्रवन्तु नः ॥१ ॥

लाजाश्च कुंकुमं चैव, सर्वोषधिसमन्वितम्।
दर्भाङ्कुरं जलं चैव, पञ्चाङ्ग पाद्य लक्षणम् ॥२ ॥
शंखाय पाञ्चजन्येदं पाद्यं नमः ॥पाद्य शेषं निवार्येत् ॥

अथोर्घ्यम्— शन्नोदेवी० ॥आपः क्षीरं कुशग्राणि, घृतं च दधितण्डुलाः।
यवाः सिद्धार्थकाचैव, ह्यर्घ्यमष्टांगमुच्यते ॥

शंखः पाञ्चजन्यः इदं ओर्घ्यं नमः ॥

गन्धम् : शंखाय पाञ्चजन्याय समालभनं गन्धं नमः ॥गन्धलेपं निवार्येत् ॥

अथान्तेऽर्घपुष्परक्षासूत्रं च। निम्न मन्त्र से शंख पर पुष्पार्पण करें :

अग्नि ऋषि पवमानः पाञ्चजन्यः पुरोहितः। तमीमहे महागयम् ॥ शंखाय पाञ्चजन्याय अर्घो नमः, पुष्पं नमः ॥ शंखाय पाञ्चजन्येदं वासो नमः, कङ्कणं नमः ॥

॥अथाग्नि कृत्यम् ॥

उदग्रान्दर्भानास्तीर्य तेषूपविशतः प्राङ्मुखा प्रतिगृहीता, सामात्यः प्रत्यङ्मुखः प्रदाता ॥ (लौ० गृ० का २५/सू० २)

भाषा : कन्यादान के अवसर पर, उत्तर दिशा की ओर जिन का सिरा हो इस प्रकार दर्भाओं को बिछा कर, उन पर पूर्वाभिमुख करके वर अपने सम्बन्धियों के साथ एवं पश्चिम की ओर मुख करके अपने सम्बन्धियों सहित प्रदाता अर्थात् कन्यादान करने वाला (यजमान) बैठे ॥

मध्ये प्राग्रोदग्रान्दर्भानास्तीर्य, तेषूदकं सन्निधाय, ब्रीहियवान्वोप्य, दक्षिणतोङ्ङासीन, ऋत्विगो उपयमनं कार्येत् ॥ (लौ० २५/३)

भाषा : (और उस सम्बन्ध को) एकत्रित लोगों के सन्मुख कहे। पुनः दाता से 'कन्या देता हूँ' और वर से 'ग्रहण करता हूँ'— ऐसा तीन-तीन बार दोनों से कहलवा कर इस सम्बन्ध को घोषित करवाये ॥

एतद्वा सत्यमित्युक्त्वा 'समानः वा०' 'समवो मनांसि' इति ऋत्विगुभौसमीक्षमाणौ जपति ॥लौ० १५/५ ॥

भाषाः तुम्हारा यह कथन सत्य है ऐसा कहकर आचार्य— 'समानः वा०' 'संवोमनांसि०'— ये दो मन्त्रोच्चारण करे ॥

॥अथ विधिः ॥

'लग्न समयं विचार्य पिता दक्षिण जानौ कन्यां गृहीत्वा'

भाषा : लग्न समय विचार कर, यजमान कन्या को अपने दक्षिण घुटने पर बिठा कर (कन्यादान का कृत्य सम्पादन करे) पुनः आचार्य लग्न रेखा स्थित दो दर्भाङ्कुर उठा कर तथा खड़े होकर यजमान को सम्बोधित कर कहे :

ॐ भगवन् ! कन्यां ददात्वस्मै भवान् ॥इति त्रिरावेदयत् ॥

भाषा : हे यजमान ! आप कन्या को इस वर के लिए देवें ॥ऐसा तीन बार कहे ॥

- 'भगवन्' शब्द पर दर्भाङ्कुर से यजमान् के सिर का स्पर्श, 'कन्यां' पर कन्या के 'ददातु' पर पुनः यजमान् के तथा 'अस्मै' पर वर के और 'भवान्' पर फिर यजमान के सिर का स्पर्श करें । फिर आचार्य वर को सम्बोधित कर कहे :

ॐ भगवन् ! कन्यां प्रतिगृहणा त्वस्माद् भवान् ॥३ ॥

भाषा : हे वर ! आप कन्या को इस (यजमान) से ग्रहण करें ॥३ बार ॥

- 'भगवन्' शब्द पर वर के सिर का स्पर्श, 'कन्या' पर कन्या का, 'प्रतिगृहणातु' पर पुनः वर के, 'अस्मात्' पर यजमान के और 'भवान्' पर पुनः वर के सिर का स्पर्श करें ॥
- आचार्य के इस आदेश पर यजमान् ओङ्कार का उच्चारण करके वर से कहे :

ॐ भगवन् ! कन्यां ददनि ते ॥ इति दातारं जल्पयेत् ३ ॥

भाषा : भगवन् ! (हे वर !) मैं आपको यह कन्या देता हूँ ॥ स्वीकार करें ॥

- उपरोक्त वाक्य आचार्य तीन बार यजमान से कहलवाये । इसके उत्तर में वर से निम्न वाक्य कहलवाये : **ॐ भगवन् ! कन्यां प्रतिगृहणामि ॥३ ॥**

भाषा : भगवन् ! मैं कन्या को ग्रहण करता हूँ ॥ तीन बार ॥

● वर के ऐसा कहने पर यजमान् पूर्व पूजित शंख में [१] दूर्वा, अक्षत, फल, पुष्प, चन्दन तिल, कुशा, जल तथा दक्षिणादि डालकर तथा शंख कन्या के हाथ में देकर तथा नीचे अपनी अञ्जुलि रखकर स्वयं (अथवा आचार्य द्वारा) निम्न वाक्यों का उच्चारण कर संकल्प क्रिया पूर्ण करें :

दाताऽहं वरुणो राजा, द्रव्यमादित्यदैवतम्।
विप्रोऽसौ विष्णु रूपेण, प्रतिगृह्णात्वयं त्रिधि ॥
कन्यादानं महादानं, सर्वदानेषु दुर्लभम्।
तदद्य दैव योगेन, त्वं गृहाण वरोत्तमम् ॥

ॐ सावित्राणि सावित्रस्य देवस्य त्वा सवितु प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे ॥ ॐ विष्णुर्विष्णुर्विष्णुः । तत्सदद्ब्रह्मणो द्वितीय परार्द्धे श्री श्वेत वाराह कल्पे, वैवस्वतमन्वन्तरेऽष्टाविंशतितमे कलियुगे, कलि प्रथम चरणे, जम्बू द्वीपे, भारत वर्षे, भरत खण्डे, आर्यावर्त्तान्तर्गत ब्रह्मवर्तैकदेशे, पुण्यप्रदेशे, द्विगर्त प्रांते, वर्तमाने (यथा नाम संवत्सरे)ऽमुकायने, महामाङ्गल्य प्रदेमासोत्तमेऽमुकमासेऽमुक पक्षेऽमुकतिथौऽमुकवासरे अस्मिन्पुण्याहे, अस्या कन्यायाः, अनेनवरेण, धर्म, प्रजया, उभयोवंशवृद्ध्यर्थं यथा च गम पितृणां निरतिशयसानन्द ब्रह्मलोकमवाप्यादि, कन्यादानकल्पोक्त फलाऽवाप्तये अनेन वरेण अस्या कन्यायामुत्पादिष्यमाण सन्तत्या, दशपूर्वान् दशाऽपरान्, मां च एक विंशति पुरुषानुद्धर्त्तुं, ब्रह्मविवाह विधिना, श्री लक्ष्मीनारायण प्रीत्येचाऽमुक गोत्रोत्तपन्नामऽमुक नाम्नी-मिमां कन्यां सुस्नातांयथा शक्तयालङ्कृतां प्रजापति देवताकाममऽमुक गोत्रोत्तपन्नोऽमुक शर्मणे (वर्मणे) विष्णुरूपेण ब्राह्मणाय (वर्मणाय वाक्षत्राय) वराय पत्नित्वेन तुभ्यमऽहं सम्प्रददे ॥

'शंखस्य द्रव्ययुक्त जलेन सह कन्या हस्तं वरहस्ते दद्यात् ॥'

भाषा : शंख के द्रव्ययुक्त जलसहित कन्या का हाथ वर के हाथ में देते हुए यजमान् पुनः निम्न वाक्य कहेः **तुभ्यं दत्ता कुमारी धर्मे चार्थे कामेचत्वयेयं परिचरणीया ॥**

भाषा : तुझको दी गई यह कन्या धर्म, अर्थ, काम— इन पुरुषार्थत्रय में तुझसे सेवा लेने योग्य है ॥

● प्रत्युत्तर में आचार्य निम्नवाक्य वर से कहलवाये :

मह्यं प्रतिगृहीता वधूः धर्मे चार्थे कामे च मयेयं परिचरणीया ॥

(१) कन्यादान समारम्भे दाता शंखे समाददेत् । दूर्वाक्षत फलं पुष्पं चन्दनं जलमेव च ॥ (बृहत्पाराशर)

भाषा : अपने लिए ग्रहण की हुई यह वधू मुझ से पुरुषार्थत्रय में सेवा लेने योग्य है ॥

- फिर आचार्य कहे— एतद्वः सत्यम् ॥ (आपका यह कथन सत्य है ।)

- इसके उत्तर में वर-यजमान एक साथ कहें : एतन्नः सत्यम् ॥ (हमारा यह कथन सत्य है)

- **'वि ते मुञ्चामि इति सन्नहनं विमुञ्चेत् ॥ तूष्णीं हस्तौ विमुच्य'**—चुपचाप वर प्रथम पकड़े हुए वधू के हाथों को छोड़कर 'वि ते मुञ्चामीति' मंत्र से 'सन्नहन' (कसकर बांध हुआ रूमालादि) खोल देवे ॥ **विशेष :** देशाचारानुसार इस स्थल पर कन्या पक्षीय आचार्य वर पक्ष से (वाग्दान) दक्षिणा लेकर, रूमालादि से बन्धे हुए वर-वधू के हाथ खोल देता है। यह तन्त्र कन्या सम्बन्धी संस्कार से सम्बद्ध है अतः इसकी दक्षिणा भी

कन्या से ही दिलवानी चाहिए थी किन्तु वधू के पास धन नहीं होता इस कारण उसके प्रत्येक दायित्व अर्द्धांगिनी होने के नाते वर पर ही होता है इसी कारण इस सन्दर्भ में भी वर को ही वधू की जिम्मेदारी के कारण आचार्य को दक्षिणा देने का आदेश युक्ति-युक्त एवं न्याय संगत है ॥

वि ते मुञ्चामि रशनां विरश्मीन्वियुक्त्राणि परिचर्त्तनानि ।
दत्त्वा यास्म्भ्यं द्रविणेह भद्रं प्रमां ब्रूताद्धविर्दान्देवताभ्य: ॥

- **तत उत्तरतोऽग्नेर्दर्भेषु प्राचीं प्रकामयति—** तत्पश्चात् आचार्य अग्नि के उत्तर में बिछाई हुई दर्भाओं पर पूर्व की ओर मुख की हुई वधू को सात पग सात मन्त्रों द्वारा यथा विधि चलावे ॥

॥ सप्तपदी ॥

(महत्ता और विधि)

सनातन धर्मानुयायियों के विवाह संस्कार में सप्तपदियों का विशेष महत्व है, इसके बिना विवाह पूर्ण नहीं माना जाता है। कहा है :

नोदकेन न वा वाचा, कन्यायाः पतिरुच्यते।
पाणिग्रहण संस्कारत्, पतित्वं सप्तमे पदे ॥१ ॥
स्वगोत्राद् भृश्यते नारी विवाहात् सप्तमे पदे ॥२ ॥
पाणिग्रहणका मन्त्रा, नियतं दार लक्षणम्।
तेषां तिष्ठातु विज्ञेया, विद्वद्‌भिः सप्तमे पदे ॥३ ॥

निष्कर्ष : विवाह संस्कार में पाणिग्रहण के मंत्र, संकल्पादि पत्नी भाव के द्योतक हैं और पूर्ण पत्नी भाव तथा पतिगोत्र प्राप्ति सप्तपदी के अनन्तर ही होती है ॥

पास्कर गृह्यसूत्रानुसारेण—अथैनामुदीचीं दिशमुदङ्‌मुखीं सप्त पदानि प्रकामयत्येकमिषे इत्यादिना— अर्थात् लाजाहोमादि के पश्चात् वधू को अग्नि की उत्तर दिशा में उत्तरोत्तर सात पग 'एकमिषेविष्णुस्त्वान्वेतु' इत्यादि निम्नमंत्रों से चलावे ॥

॥अथ विधि ॥

- अग्नि के उत्तर में बिछाई हुई दर्भाओं को यथा क्रम उत्तरोत्तर (आगे आगे) सात स्थानों पर रखकर तथा दोनों पक्षों द्वारा किन्तु वर पक्ष द्वारा विशेष रूप से कम से कम एक रुपया और अधिकाधिक यथाशक्ति प्रत्येक पग धरने के स्थल पर दक्षिणा डालकर पूर्व की ओर मुख की हुई वधू को निम्न मन्त्रों से सात पग चलावे :

ओ३म् एकम् इषे विष्णुस्त्वाऽन्वेतु ॥१ ॥

मन्त्रार्थः (हे वधू !) यह पहला (एकम्) एक पग (इषे) अन्न के लिए धर । (विष्णु) सर्व-व्यापक प्रभु, यज्ञ, सत्य, धर्म, सदाचार तथा ज्ञान (त्वा अनु एतु) तेरे पीछे आवे ॥१ ॥

ॐ द्वे ऊर्जे विष्णुस्त्वाऽन्वेतु ॥२ ॥

मन्त्रार्थ : (द्वे) दूसरा पग (ऊर्जे) बल के लिए धर । शेषपूर्ववत् ॥२ ॥

ॐ त्रीणि रायस्पोषाय विष्णुस्त्वाऽन्वेतु ॥३ ॥

मन्त्रार्थ : (त्रीणि) तीसरा पग तू (रायस्पोषाय) धन पुष्टि एवं वृद्धि के लिए धर । शेष पूर्ववत् ॥

ॐ चत्वारि मयोभवाय विष्णुस्त्वाऽन्वेतु ॥४ ॥

मन्त्रार्थ : (चत्वारि) यह चौथा पग तू (मयोभवाय) सुख वृद्धि के लिए धर । शेष पूर्ववत् ॥४ ॥

ॐ पञ्चं प्रजाभ्यः विष्णुस्त्वाऽन्वेतु ॥५ ॥

मन्त्रार्थ : (पञ्चम्) और यह पांचवाँ पग (प्रजाभ्यः) पारिवारिकवृद्धि अर्थात् पुत्रादि के लिए धर । शेष पूर्ववत् ॥५ ॥

ॐ षष्ठं षड्ऋतुभ्यो विष्णुस्त्वाऽन्वेतु ॥६ ॥

मन्त्रार्थ : (षष्ठम्) यह छठा पग तू (षड्ऋतुभ्यो) छः ऋतुओं के सुखानन्द के लिएधर । शेष पूर्ववत् ॥६ ॥

ओ३म दीर्घायुत्वाय सप्तमं सखा सप्तपदाभव सुमृळीका ।
सरस्वति मा ते व्योम सन्दृशे विष्णुस्तान्वेतु ॥७ ॥

मन्त्रार्थ : (हे कन्ये !)— (सप्तपदा) सात पग धरने वाली तू (सप्तमम्) यह सातवाँ पग (दीर्घायुत्वाय) दीर्घायु (सौ वर्ष से ऊपर) के लिए (सखा) आनन्द एवं पतिव्रत धर्म पालन करने के लिए तथा (सुमृळीका) इह लोक और परलोक में (सरस्वति) यश प्राप्त्यर्थ धर । (सखा सरस्वति) हे सहधर्मिणी भूता, सरस्वती रूपा ! (ते) तेरी सप्तपदी को (व्योम) आकाश स्थित कोई खेचर (मा) मत (सन्दृशे) देखे अर्थात् किसी खेचर की नज़र न लगे । शेष पूर्ववत् ॥७ ॥

- **सप्तपदी के अनन्तर—तच्चक्षुरित्यादित्यमुपस्थापयति दिवा—** यदि दिन का विवाह हो तो वर (वा आचार्य) निम्नमंत्र से वधू द्वारा सूर्य का उपस्थान (खड़े होकर देवार्चना वा नमस्कार) करावे : ओ३म् तच्चक्षुर्देवहितम् पुरस्ताच्छुक्रमुच्चरत ।

पश्येम शरदः शतम्, जीवेम शरदः शतम्, शृणुयाम शरदः शतम्,
प्रब्रुवाम शरदः शतमऽदीनास्याम शरदः शतम्, भूयश्च शरदः शतात् ॥

मन्त्रार्थ : स्वाहा, स्वधा प्रभृति सम्पूर्ण देवता और पितर जिसके उदय होने से तृप्त होते हैं, ऐसे विराट् भगवान् के नेत्र जो सूर्यदेव, देवहितार्थ भए और जो आदि में कामादि और अविद्या आदि दोषरहित उदय को प्राप्त हो ऊर्ध्व को जाता है उस भगवान् दिवाकर को हम १०० वर्ष पर्यन्त देखें और जीवित रहें, कानों से यश श्रवण करें, वाणी से यशोगान करें और अदीन अर्थात् धन-धान्य से परिपूर्ण होकर सौ वर्ष अधिक पूर्णायु प्राप्त करें ॥

- **मन्त्र को पढ़कर वर वधू से कहे : सूर्यं पश्यसि ?** (सूर्य को देखती हो ?)
  वधू प्रत्युत्तर दे— पश्यामि (देखती हूँ)
- पुनः वधू पूर्व लिखित मन्त्रोच्चारण करते हुए सूर्य देव को भक्तिभाव से हाथ जोड़ दर्शन करे ।
- **'अस्तमितेऽग्निमुपस्थापयति रात्रौ'—** और सूर्यास्त हो जाने पर अर्थात् रात्रि के विवाह में अग्निदेव का उपस्थान करावे । यथाः

जीवन्तीं पश्यसि ? पश्यामः ॥ ध्रुवं पश्यसि ? पश्यामः ॥
स्वस्त्यात्रैयं पश्यसि ? पश्यामः ॥ अरुन्धतीं पश्यसि ? पश्यामः ॥

'एतेषांमैकैकं पश्यसि इत्याह ऋत्विक् । पश्यामः इति सर्वत्र प्रत्याह वधूः'

भाषा : इन उपरोक्त संज्ञा पदों को आचार्य वधूसे 'पश्यसि' पर्यन्त एक-एक करके पूछे और वधू प्रत्युत्तर में 'पश्यामः' शब्द क्रमिक रूप से कहे । (उत्तर बहुवचन में उपयुक्त है) ॥

- इसके पश्चात् आचार्य वर द्वारा निम्न मन्त्र से वधू के लिए देखे जाने वाले तारागणों को अभिमन्त्रित करे :

सुमङ्गलीरियं वधूरिमा समेत्य पश्यत ।
सौभाग्यस्मै दत्वा यथास्वं विपरेतन ॥

मन्त्रार्थ : हे ध्रुवादि तारागण ! आपके प्रसाद से यह वधू शोभन मङ्गलयुक्ता होवे । आप सभी देवता वधू को मिलकर देखिए और इसे सौभाग्यादि वरदान देकर पुनः आने के लिए जाओ ॥

॥इति शम् ॥

॥अथ सूर्यवर्गम् ॥

● अथ सूर्य वर्गं पठेत्— इसके पश्चात् सूर्यवर्ग पढ़ा जाये । इस ऋग्वेदोक्त सूक्त को पद्धति में 'सूर्यवर्ग' की संज्ञा दी गई है, यही कारण है कि इसे दिन के विवाह में पढ़ने की प्रथा है । अन्यथा उक्त सूक्त का पाठ एवं व्याख्या वर-वधू के लिए अनुकरणीय और आगामी जीवन के लिए अनुसरणीय है । विस्तार भय से मूल पाठ ही दिया जा रहा है ॥

ओ३म् संसृष्टं धनमुभयं समाकृतम् अस्मभ्यं दत्तं वरुणश्च मन्युः ।
भियं दधाना हृदयेषु शत्रवः पराजितासो अपनिलयन्ताम् ॥१ ॥
सत्येनोत्तुभिता भूमिः, सूर्योणोत्तुभिता द्यौः ।
ऋतेनादित्यास्तिष्ठन्ति, दिवि सोमो अधिश्रितः ॥२ ॥
सोमेनादित्या बलिनः, सोमेन पृथिवी मही ।
अथो नक्षत्राणामेषाम्, उपस्थे सोम आहितः ॥३ ॥
सोमं मन्यते पपिवान्, यत् संपिशन्त्योषधिम् ।
सोमं यं ब्रह्मणो विदु, र्न तस्याशनाति पार्थिवः ॥४ ॥
आच्छद् विधानैर्गुपितो, बार्हतैः सोमो रक्षितः ।
गृब्णामि च्छृण्वँस्तिष्ठसि, न ते अश्नाति पार्थिवः ॥५ ॥
यत्त्वां देवाः प्रपिबन्ति, तत आप्यायसे पुनः ।
वायुः सोमस्य रक्षिता, समानं मास आकृतिः ॥६ ॥

रैभ्यासीदनुदेयी नराशंसीन्योचिनी ।
सूर्याया भद्रमिद्वासो गाथयैति परिष्कृतम् ॥७ ॥

चितिरा उपर्वहणं चक्षुरा अभ्यञ्जनम्।
द्यौर्भूमिः कोश आसीद्य दयात्सूर्या पतीम् ॥८॥
स्तोमा आसन्परिधयः कुवीरंच्छन्द ओपशः।
सूर्याया अश्विना वराग्नि रासीत्पुरोगवः ॥९॥
सोमो वधूयुरऽभवदऽश्विना स्तामुभावरा।
सूर्यां यत्पत्ये शंसन्तीं मनसा सविता दधत् ॥१०॥
मनो अस्या अनु आसीद् द्यौरासीद् उतच्छदिः।
शुक्रावनुडवाहा वास्तां यदयात्सूर्या गृहम् ॥११॥ व०२॥
ऋक्सामभ्याम् अभि हितै गावौ ते सोम वावितः।
श्रोत्रं ते चक्रमास्तां दिवि पन्थाश्चराचरः ॥१२॥
शुची ते चक्र यत्याव्यानो अक्ष आहतः।
आ नो मानस्मयं सूर्योऽरोहत्प्रयती पतिम् ॥१३॥
सूर्याया वहतुः प्रागात्सविता यमऽवासृजत्।
अघास्व हन्यते गावोर्जुन्योः पर्युह्यते ॥१४॥
यदश्विना पृच्छमानावयातं त्रिचक्रेण वहतु सूर्यायाः।
विश्वेदेवा अनुतद्वामऽजानन् पुत्रः पितराव बृणीत पूषा ॥१५॥
यदयातं शुभस्पती वरेयं सूर्याम् उप।
क्वैकं चक्रं वामासीत् क्व देष्टाय तस्थथुः ॥१६॥ व० ३॥
द्वे ते चक्रे सूर्ये ब्रह्माण ऋतुथा विदुः।
अथैकं चक्रे यद्गुहा तद् अद्धा ता य इद्विदुः ॥१७॥
सूर्यायै देवेभ्यो मित्राय वरुणाय च।
ये भूतस्य प्रचेत स इदं तेभ्योऽकरं नमः ॥१८॥
पूर्वाऽपरं चरतौ माययैतौ शिशू क्रीडन्तौ परियातौ अध्वरम्।

विश्वानि अन्यो भुवनाभिचष्ट ऋतूनन्यो विदधज्जायते पुनः ॥१९ ॥

नवो नवो भवति जायमानोह्नां केतुरुषसामेत्यग्रम् ।
भावन्देवेभ्यो विदधात्यायन् प्रचन्द्रमास्तिरते दीर्घमायुः ॥२० ॥

सुकिं शुक्रं शल्मलिं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रम् ।
आरुह्य सूर्ये अमृतस्य लोकं स्येनं पत्ये वहतुं कृण्वष्व ॥२१ ॥ व०४ ॥

उदीर्ष्वाता पतिवती ह्येषा विश्वावसुर्नमसा गीर्भिरीळे ।
अन्यमिच्छ पितृषदं व्यक्तं स ते भागो जनुषा तस्य विद्धि ॥२२ ॥

उदीर्ष्वातो विश्वासो नमसेळामहे त्वा ।
अन्यमिच्छ प्रफल्यं सञ्जायापत्या सृज ॥२३ ॥

अनृक्षरा ऋजवः सन्तु पन्था येभिः सखायो यन्तिनो वरेयम् ।
समर्यमा सम्भगो नो निनीयात्सञ्जास्पतयं स्वयमस्तु देवाः ॥२४ ॥

प्र त्वा मुञ्चामि वरुणस्य पाशाद्येन त्वा बध्नात्सविता सुशेवः ।
ऋतस्य योनौ सुकृतस्य लोके रिष्टां त्वा सह पत्या दधामि ॥२५ ॥

प्रेतो मुञ्चामि नामुतः सुबद्धाममुतस्करत् ।
यथे यमिन्द्र मीढ्वः सुपुत्रा सुभगा सती ॥२६ ॥ व०५ ॥

पूषा त्वेतो नयतु हस्तं गृह्याश्विनौ त्वां प्रवहतां रथेन ।
गृहान् गच्छ गृहपत्नी यथासो वशिनी त्वं विदथेमा वदामि ॥२७ ॥

इह प्रियं प्रजया ते समृद्ध्यतामस्मिन्गृहे गार्हपत्याय जागृहि ।
एना पत्या तन्वा संसृजस्वाथाजिव्री विदथमा वदाथः ॥२८ ॥

नील लोहितं भवति कृत्या सक्तिर्व्यज्यते ।
एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बद्ध्यते ॥२९ ॥

परा देहि शामूल्यं ब्रह्मभ्यो विभजा वसु ।
कृत्यैषा पद्धती भूत्वा जाया विशते पतिम् ॥३० ॥

अश्लीरा तनूर्भवति रुषती पापयाऽमुया।
पतिर्यद्वधूवाससा स्वमङ्गमऽभिधित्सते ॥३१ ॥ व ०६ ॥
ये वध्वश्चन्द्रं वहंतु यक्ष्मायन्ति जनादनु।
पुनस्तान्यज्ञिया देवा नयन्तु यत आगताः ॥३२ ॥
मा विदन्परिपन्थिनो य आसीदन्ति दम्पती।
सुगेभिर्दुर्गमऽतीतामऽपद्र वन्त्वऽरातयः ॥३३ ॥
सुमङ्गलीरियं वधूमिमां समेत पश्यत।
सौभाग्यमस्मै दत्वा यथाऽस्तं विपरेतन ॥३४ ॥
तृष्टमेतत्कटुकमेतदपाष्ट वद्विषवन्नैतदर्तवे।
सूर्यां यो ब्रह्म विद्यात्स इद्वाधूयमर्हति ॥३५ ॥
आशासनं विशासनमथो अधिविकर्तनम्।
सूर्यायाः पश्य रूपाणि तानि ब्रह्मा तु शुन्धति ॥३६ ॥ व०७ ॥
गृब्णामि ते सौभगत्वाय हस्तै मया पत्या जरदष्टिर्यथासत्।
भगो अर्यमा सविता पुरन्धिर्मह्यं त्वाऽदुर्गार्हस्पत्याय देवाः ॥३७ ॥
तां पूषं शिवतमामेरयस्व यस्यां बीजं मनुष्या वपन्ति।
या न अरू उशती विश्रया ते यस्यामुशन्तः प्रहराम शेषम् ॥३८ ॥
तुभ्यमग्रे पर्यवहत्सूर्यां वहतु ना सह।
पुनः पतिभ्यो जायां दा अग्ने प्रजया सह ॥३९ ॥
पुनः पत्नीमग्निरदादायुषा सह वर्चसा।
दीर्घायुरस्या यः पतिर्जीवातु शरदः शतम् ॥४० ॥
सोमः प्रथमो विवेद गन्धर्वो विवेद उत्तरः।
तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजः ॥४१ ॥ व०८ ॥
सोमो ददद् गन्धर्वाय गन्धर्वोददद् अग्नये।
रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम ॥४२ ॥

इहैवा तस्मा वियौष्टं विश्वमायुर्व्यश्नुतम्।
क्रीडन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे ॥४३ ॥

आ नः प्रजां जनयतु प्रजापतिराजरसाय समनमक्त्कर्यमा।
अदुर्मङ्गलीः पतिलोकमाविवेश शन्नोभवद्विपदे शं चतुष्पदे ॥४४ ॥

अघोरचक्षुरपतिघ्न्येऽधिशिवा पशुभ्यः सुमनाः सुवर्चाः।
वीर सूर्देवकामा स्योना शन्नोभव द्विपदे शं चतुष्पदे ॥४५ ॥

इमां त्वामिन्द्र मीढ्वः सुपुत्रां सुभगां कृण्व।
दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि ॥४६ ॥

सम्राज्ञा श्वशुरे भव सम्राज्ञी श्वश्वां भव।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधिदेवृषु ॥४७ ॥

समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ।
सम्मातरिश्वा सन्धाता समुदेष्ट्री दधातु नौ ॥४८ ॥

ध्रुवोऽधिपुष्या मयि मह्यं त्वादाद् बृहस्पतिः।
मया पत्या प्रजावती सञ्जीव शरदः शतम् ॥४९ ॥ व० ९ ॥

विहिसेतोरसृक्षत नेन्द्रं देवमऽमंसत।
यत्रा सदद् वृषा कपरिर्यः पुष्टेषु सत्सखा, विश्वस्मादिन्द्र उत्तरः ॥५० ॥

॥इति सूर्यवर्ग वाचनम् ॥

॥कन्यापितु ब्राह्मणपूजनम् ॥

- सूर्य वर्ग पढ़ने के पश्चात् कन्या का पिता ब्राह्मण पूजनार्थ पृच्छा सम्पादन कर निम्न रीति से ब्राह्मण पूजन करे :

ओ३म् गायत्र्यै नमः। ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो योनः प्रचोदयात् ॥३ ॥ ॐ तत्सदयतावत् मासोत्तमे महामाङ्गल्य प्रदेऽमुकमासेऽमुकपक्षेऽमुक तिथौऽमुकवासरे अग्नेर्यविष्ठस्य, अग्नेः पुष्टिपतेः प्रजापतेः अर्यम्णः गन्धर्वस्य त्र्यम्बकस्य कन्योद्वाह निमितं ब्राह्मण पूजनमर्चामहं करिष्ये। आचार्यकहे— ॐ कुरुष्व ॥

- आज्ञा प्राप्त कर यजमान ब्राह्मण को प्रथम तिलक करे । पुनः हाथ धोकर अर्घपुष्प सिर पर धरे, पश्चात् दक्षिणा दे, फिर अर्घपात्र में कुछ फुटकर तथा जल डालकर वह पैसे ब्राह्मण को जल सहित दे, ब्राह्मण जल वापिस यजमान के पात्र में डाले तथा यजमान उस जल से अपना अभिषेक करे ॥

- **'आश्रावितामिति पूर्णां विमुच्य। इत्योद्वाहतन्त्रम्'** अर्थात् 'आश्राविता०' इस निम्न मन्त्र से पूर्णाहुति देकर, अग्नि के चारों ओर प्रथम बिछाई हुई कुशाओं को उठाकर, अग्नि को उन कुशाओं की परिधि से स्वतन्त्र करें—

**आश्रावितमत्याश्रावितं वषट् कृतमऽवषट् कृतम्।
अननूक्तमत्यननूक्तं च यज्ञे रिक्तं यच्च हीनमग्निष्टानि
प्रवेदन्नेतु कल्पयन् स्वाहा ॥**

मन्त्रार्थ : पृष्ठ संख्या १६२ पर देखें।

॥अथ वरस्य प्रायश्चित्त होम :॥

पुनः अग्निं परिसमुह्य। पर्युक्ष्य। परिषिच्य ९। परिस्तीर्य १६। नास्तिनिर्वापणम्॥ रोहिण्यमूलेन वा, यद्वा पुण्योक्त क्रमेणाग्निमानुडुहे रोहिते चर्मण्योपविश्यापि वा दर्भेष्वेव जया प्रभृतिभिर्हुत्वा। अग्निरैतु प्रथम इत्यादयाः पञ्चदशाहुती : स्रुवेण जुहोति॥

भाषा : (अब इस स्थल पर वर की ओर से प्रायश्चित्तहोम प्रारम्भ होता है) पुनः अग्नि का परिसमूहन, पर्युक्षण, परिषिञ्चन कर तथा कुशाओं का परिस्तरण करना। यहाँ निर्वापण (आहुति) नहीं होता॥ रोहिणी या मूल नक्षत्र से युक्त जब चन्द्रमा हो अथवा ज्योतिषशास्त्रोक्त किसी पुण्य दिन में अग्नि के पश्चिम दिग्भाग में लाल चर्म पर अथवा केवल दर्भाओं पर ही वधू को बिठा कर तथा स्वयं (वर) भी बैठ कर पक्षयागानुसार केवल घृत से 'जया' आदि संज्ञक आज्यभागान्त तक होम करे। 'अग्निरैतुं से मन्त्र प्रारम्भकर १५ आहुतियां स्रुव से होम करे॥

॥अथ विधिः॥

[१]ऋतन्त्वा सत्येन अग्निं' परिसमूह्यामि, [२]सत्यन्त्वर्तेन परिसमूह्यामि, [३]ऋतसत्याभ्यां त्वा परिसमूह्यामि॥ [४]ऋतन्तत्वासत्येन पर्युक्ष्यामि, [५]सत्यन्त्वर्तेन पर्युक्ष्यामि, [६]ऋतसत्याभ्यां पर्युक्ष्यामि, [७]ऋतन्त्वासत्येन परिषिञ्चामि, [८]सत्यन्त्वर्तेन परिषिञ्चामि, [९]ऋतसत्याभ्यां परिषिञ्चामि॥

- उपरोक्त मन्त्रों से अग्नि पर नव बार जल छिड़कने के बाद— **आदौ पञ्च पुनस्त्रीणि त्रीणि-पञ्च तथैवच। [५]पूर्वतः, [३]दक्षिणतः, [४]पश्चिमतः, [५]उत्तरतः॥**

- कुशाओं को पूर्व, दक्षिण, पश्चिम और उत्तर में ५ ।३ ।३ ।५ के कर्म से अग्नि के चारों ओर बिछाये॥ फिर पक्षयागानुसार अगली क्रिया का सम्पादन करे— यथाः

अग्नये वायते सूर्याय चन्द्रमसे विष्णवे प्रायश्चित्तयागदेवताभ्यः अग्नये वैश्वानराय इदमाज्यमर्पयामि नमः॥

ॐ प्रजापतये स्वाहा (इतिमनसः) ॥ ॐ इन्द्रायस्वाहा ॥ (इत्याघारौ) ॥१ ॥
ॐ अग्नये स्वाहा। ॐ सोमाय स्वाहा ॥ इत्याज्यभागः ॥२ ॥
ॐ भूः स्वाहा। ॐ भुवः स्वाहा। ॐ स्वः स्वाहा ॥ इतिमहाव्याहृति ॥३ ॥
ॐ भूर्भुवः स्वः स्वाहा ॥३ ॥४ ॥

॥आयुषा प्राणं इति चतस्रः ॥

आयुषा प्राणं सन्तनु स्वाहा। प्राणाद् व्यानं सन्तनु स्वाहा।
व्यानादपानं०। अपनाच्चक्षुः ०। चक्षुषः श्रोत्रं ०। श्रोत्राद् वाचं०।
वाचाऽऽत्मानं ०। आत्मनः पृथिवीं ०। पृथिव्याऽन्तरिक्षं ०। अन्तरिक्षाद् दिवं ०।
दिवः स्वः सन्तनु स्वाहा ॥

॥द्वादशगृहीतेनाज्येन जया होमः ॥

ओ३म् आकूतं चाकूतिश्च, आधीतं चाधीतिश्च, विज्ञातं च विज्ञातिश्च,
चित्तं च। चितिश्च, नाम च क्रतुश्च, दर्शशच पौर्णमासश्च,
प्रजापतिर्जया निद्राय वृष्णे प्रायच्छदुग्रः पृतनज्येषु तेभिर्वाजं
वा जयन्तो जयेन ते तेमा विश्वाः पृतना अभिष्याम स्वाहा ॥

॥चतुर्गृहीतेनाभ्यातानां देवानां होमः ॥

बृहस्पतिः पुरोहिताः देवाः देवानां देवदेवाः प्रथमजा देवा देवेषु पराक्रमध्वम् ॥१ ॥
प्रथमा द्वितीयेषु द्वितीयास्तृतीयेषु त्रिरेकादशत्रियांस्त्रिशा अनु व आरभ ॥२ ॥
इदं शकेयं यदिदं करोमि ॥३ ॥ ते मा वत जन्विताऽस्मिन्ब्राह्मण्यऽस्मिन् क्षत्रेऽस्यामाऽऽशिष्यस्या पुरोध्याऽस्य देवहूत्याम स्वाहा ॥४ ॥

।।राष्ट्रभृतानां देवानां होमः ।।

ऋताषाड्ऋतु धामाग्निर्गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मैस्वाहा वट् ॥१ ॥
तस्यौषधियोऽप्सरसो मुदानाम् ताभ्यः स्वाहा वट् ॥२ ॥
सुषुम्णः सूर्यरश्मि चन्द्रमा गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वट् ॥३ ॥
तस्य नक्षत्राण्यऽपसरसो भेकुरयो नाम ताभ्यः स्वाहा वट् ॥४ ॥
संहितो विश्वसामा सूर्ययोर्गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा । वट् ॥५ ॥
तस्य मरीचयोऽप्सरस् आयुवो नाम ताभ्यः स्वाहा वट् ॥६ ॥
भुज्युः सुपर्णो यज्ञोगन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वट् ॥७ ॥
तस्य दक्षिणाऽप्सरस्वतवा नाम ताभ्यः स्वाहा वट् ॥८ ॥
प्रजापतिर्विश्वकर्मा मनो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातुतस्मै स्वाहा वट् ॥९ ॥
तस्य ऋक्सामान्यऽपसरस एषयो नाम ताभ्यः स्वाहा वट् ॥१० ॥
इषिरो विश्व व्यचा वातो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वट् ॥११ ॥
तस्याऽऽपोऽप्सरस ऊर्जो नाम ताभ्यः स्वाहा वट् ॥१२ ॥
स नो भुवनस्यपते यस्य त उपरिग्रहा विराट् पते अस्मै ब्रह्मणेऽस्मैक्षत्राय महिशर्म—
यच्छ स्वाहा ॥१३ ॥ (मन्त्रार्थ गत तन्त्र में देखें)

।।अग्निर्भूतानामित्येकविंशत्याधिपत्यानि जुहोति ।।

अग्निर्भूता नामधिपतिः स माऽवतु तस्मै स्वाहा ॥१ ॥
यमः पृथिव्याधिपतिः स माऽवतु तस्मै स्वाहा ॥२ ॥
वायुरन्तरिक्षस्याधिपतिः स माऽवतु तस्मै स्वाहा ॥३ ॥
सूर्यो दिवोऽधिपतिः स माऽवतु तस्मै स्वाहा ॥४ ॥
चन्द्रमा नक्षत्राणामधिपतिः स माऽवतु तस्मै स्वाहा ॥५ ॥
विष्णोर्दिशामधिपतिः स माऽवतु तस्मै स्वाहा ॥६ ॥

पूषा पृथिवी नामधिपतिः ० ॥७ ॥ त्वष्टा रूपाणामधिपतिः ० ॥८ ॥
सविता प्रसवानामधिपतिः ० ॥९ ॥ इन्द्रो ज्येष्ठा नामधिपतिः ० ॥१० ॥
मित्रः सत्यानामधिपितः ० ॥११ ॥ वरुणो धर्मानामधिपितः ० ॥१२ ॥
रुद्रा पशूनामधिपतिः ० ॥१३ ॥ बृहस्पतिर्ब्रह्मणामधिपितः ० ॥१४ ॥
ब्राह्मणो वाचामधिपितः ० ॥१५ ॥ सोमो औषधीनामधिपतिः ० ॥१६ ॥
समुद्रः स्रवन्तीनामधिपतिः ० ॥१७ ॥ अन्नं साम्राज्यानामधिपतिः ० ॥१८ ॥
गायत्रीच्छन्दसामधिपत्नी सा माऽवतुतस्यै स्वाहा ॥१९ ॥
मरुतः गणानामधिपतिः स माऽवतु तस्मै स्वाहा ॥२० ॥
पितरः पितामहाः परवरेभ्यस्ते नः पान्तु ते नोऽवन्त्वस्मिन् ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशिष्यस्यां देवहूत्यां स्वाहा ॥२१ ॥

(उपर्युक्त मन्त्रों का अर्थ पूर्व तन्त्र में दिया जा चुका है। अतः वहां से ग्रहण करें)

॥अथाग्निरैतु इति चतस्रः ॥

विनियोगः

ॐ अग्निरैत्वादि चतस्रमंत्राणां प्रजापति ऋषिः त्रिष्टुप् छन्दः मन्त्रोक्त देवता
घृत होमे विनियोगः ॥ उक्त मन्त्र बोलकर जल गिरायें
अग्निरैतु प्रथमो देवतानाँ सोस्यै प्रजां मुञ्चतु मृत्युः पाशात्।
तदयाँ राजा वरुणो नु मन्यताँ यथेयँ स्त्रीपोत्र मघन्नरोदात् स्वाहा ॥१ ॥

मन्त्रार्थ : सब देवताओं से प्रथम अग्निदेव आवे, वह इस की सन्तती को मृत्यु पाश से छुड़ावे अथवा मृत्यु पाश को भस्मकर इस का प्रजा पुत्रादि वरुण राजा की आज्ञा से जैसे यह स्त्री सम्बन्धी दुःख से न रोये ऐसी प्रजा पुत्रादि सन्तान को देवे ॥१ ॥

अग्निरिमां त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः।
अशून्योपस्था जीवितामऽस्तु माता पौत्रमानन्दमभि प्रबुध्यतामियाँ स्वाहा ॥२ ॥

मन्त्रार्थ : अग्निहोत्र सम्बन्धी अग्नि इस कन्या के पुत्रादि को दीर्घायु प्राप्त कराये। इसकी गोद पुत्रों से कभी खाली न रहे तथा यह स्त्री पुत्र पौत्रादि सम्बन्धी आनन्द को भोगे ॥२ ॥

मा ते गृहे निशि घोर उत्थादऽन्यत्र त्वद् रुदत्यः संविशन्तु।
जीव पुत्रा पतिलोके विराज पशयन्ती प्रजां सुमनस्यमाना स्वाहा ॥३ ॥

मन्त्रार्थ : हे वधू ! तेरे घर में रात को कभी भयानक शोर न उठे। रोने वाले लोग तुझसे दूर देश में निवास करें। तू सुखी सन्तती को देखती हुई पतिगृह में विशेष शुभ युक्त होवे ॥३ ॥

मा ते कुमारः स्तन्धः प्रमायि मा त्वां विकेश उर आवधिष्ठः।
स्तनधयं ते सविता भिरक्षत्वऽवाससः परिधानाद बृहस्पतिः।
विश्वे देवाः अभिरक्षन्तु नित्यं स्वाहा ॥४ ॥

मन्त्रार्थ : हे वधू ! तेरा कोई दूध पीता बालक मृत्यु को प्राप्त न हो और तू किसी भी समय स्वामी के वियोग के कारण विकेशी तथा हृदय को पीटने वाली न होवे। तेरे दुधमुंहे बच्चे की सविता देव रक्षा करे, देव गुरु बृहस्पति सामान्य वस्त्र से लेकर परिधान वस्त्र तक रक्षा करे तथा समस्त देवगण तेरी सदैव रक्षा करें, उनके लिए हवि सुहूत होवे ॥४ ॥

॥अग्नेप्रायश्चिते ० इत्यादि पञ्चदेवानां क्रमोत्क्रमार्षम् ॥

अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि।
यास्यां भृशा तनूस्तामस्यां नाशय स्वाहा ॥१ ॥

वायोः प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि।
याऽस्यां भृशा तनूस्तामऽस्यां नाशय स्वाहा ॥२ ॥

सूर्यः प्रायश्चित्ते० ॥३ ॥ चन्द्रः प्रायश्चित्ते ० ॥४ ॥ विष्णोः प्रायश्चित्ते ० ॥५ ॥
विष्णोः प्रायश्चित्ते) ॥६ ॥ चन्द्रः प्रायश्चित्ते ० ॥७ ॥ सूर्यः प्रायश्चित्ते ० ॥८ ॥
वायोः प्रायश्चित्ते ० ॥९ ॥

अग्नेः प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ।
यास्यां भृशा तनूस्तामस्यां नाशय स्वाहा ॥१० ॥

मन्त्रार्थ : (अग्ने प्रायश्चिते) हे पाप नाशक अग्निदेव ! (त्वं) तू (देवानाम्) सब देवताओं की (प्रायश्चितिः) पाप निवारक शक्ति का निमित्त (असि) है । अतः (अस्याम्) इस वधू में (या) जो किसी कारण से (अस्यां तनूः) इसका शरीर यदि सन्तान विरोधी, पशु, गृह, यश तथा पति विरोधी दुर्गुणों से युक्त है तो इसके शरीरगत उक्त अवगुणों को, यथा क्रम अग्निदेव, वायु, सूर्य, चन्द्रमा तथा विष्णुदेव, अपने अनुग्रह से नाशकर सद्गुण धारण करायें ॥

- पुनः बैठकर स्रुवस्थ शेष घृत में भस्म का मिश्रण कर निम्न मन्त्र (यजु० अ० ३ मं० ६२) से आचार्य वर-वधू के निम्नोक्त अङ्गों पर अनामिका अङ्गुली से भस्म लगावे :

त्र्यायुषं जमदग्ने इतिललाटे । कश्यपस्य त्र्यायुषं इति ग्रीवायाम् ।
यद् देवेषु त्र्यायुषं इति दक्षिण बाहुमूले । तन्नोऽस्तु त्र्यायुषं इति हृदये ।
तत्तेऽस्तु त्र्यायुषं इति हृदये ॥

मन्त्रार्थ : जमदग्नि की जो बाल्य, यौवन और वार्धक्य— ऐसी तीन प्रकार की आयु हुई है और कश्यप की जो तीन प्रकार की आयु तथा देवगणों की तीन प्रकार की आयु हुई है वह त्रिगुणात्मक आयु वर-वधू को पृथक-पृथक प्राप्त होवे ॥ 'तन्नो' से वर को और 'तत्ते' से वधू को भस्म लगावे ॥

- पुनः अलग एक पात्र में आज्यशेष के उद्धृत घृत में दही मिलाकर निम्न मन्त्र बोलकर तीन बार घृतमिश्रित दही वधू को वर खिलावे :

दधिक्रावणो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत् प्रण आयूँपिता रिषत् ॥

मन्त्रार्थ : सर्व विजयी, अशन के व्यापक अन्नपति, जठरस्थ अग्नि की मैं उपासना करता हूँ। यह अग्नि हमारे दही भक्षण करने वाले मुखों को सुगन्धित करे तथा हमारे जीवन की वृद्धि करे ॥

- **॥मानवकायोत्सङ्गे। इळामग्ने इति (अक्षोट १०) फलानि प्रददाति ॥**

- वर इसके पश्चात् शुद्ध मन से यथेष्ट पुत्र कामनार्थ निम्न मन्त्र से १० अखरोट वधू की गोद में डालता है। लोक रीति में पुनः वधू उन अखरोटों को वर पक्षीय यजमान की गोद में डालकर तथा सादर प्रणाम करती है और यजमान वधू को आशीर्वाद देते हुए धन देकर सत्कृत करता है ।

इळामग्ने पुरुंदसं सन्निङ्गोः शश्वत्तमां हवमा नाय साध।
स्यान्नः सूनुस्तनयो विजावाग्ने साते सुमतिर्भूत्वस्मै स्वाहा ॥

मन्त्रार्थ : हे अग्ने ! तू अनेक कर्मों के आश्रय, गवादि के वृद्धिकारक अन्न को यजमान के लिए सिद्ध कर। हमको पुत्र होवे, वह पुत्र बहुत सन्तती वालाहोवे। हे अग्निदेव ! तेरी वह सुमति होवे जिससे तू हमारे लिए अन्नादि सुखकारी साधनों को सिद्ध करे ॥

- **'ऋतु तिथ्यादि तन्त्रे समाप्ति'**— इसके पश्चात् पूर्वोक्त विधि से ऋतु-तिथ्यादि होम के बाद यह तन्त्र समाप्त होता है। उक्त तन्त्र वधू प्रवेश के बाद करना युक्ति संगत है ॥

॥वरस्य ब्राह्मण पूजनम् ॥

ओ३म् गायत्र्यै नमः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहिधियो यो नः प्रचोदयात् ॥३॥ ओ३म् अद्य तावत् मासोत्तमेऽमुकमासेऽमुकपक्षेऽमुकवासरे अग्नेर्यविष्ठस्य अग्नेः वायोः सूर्यस्य चन्द्रस्य विष्णोः प्रायश्चित्त देवतानां आत्मोद्वाह निमित्तं ब्राह्मण पूजनमर्चामहं करिष्ये। आचार्य कहे— ॐ कुरुष्व ॥

- पृच्छा का कार्य समाप्त होने पर वर-तिलक, अर्घपुष्प तथा दक्षिणादि से ब्राह्मण पूजन करे। पुनः निम्न मन्त्र से पूर्णाहुति देकर तन्त्र समाप्ति :

आश्रावितमत्याश्रावितं वषट् कृतमवषट् कृतं। अननूक्तमत्यननूक्तं च यज्ञेऽतिरिक्तं यच्चहीनमग्निष्टानि प्रवदन्नेतु कल्पयन् स्वाहा ॥

मन्त्रार्थ : गत तन्त्र पृष्ठ संख्या १६२ पर देखें ॥

- इस स्थल पर कन्या का नाम बदला जाता है । यदि कन्या और वर के नाम परस्पर मिलान में शुभ न हों तो आवश्यकता में कन्या का नाम बदला जाता है, वर का नहीं । कन्या का नाम रखने के लिए मैलापक सारणी में वर के नक्षत्र के नीचे जहां दोषाङ्क का अभाव हो या दोष थोड़ा समझकर ऋण (—) का चिह्न लिखा हो उसी खाने में ऊपर गुण संख्या भी १८ से अधिक मिले उसी के बाँई ओर जो नक्षत्र मिला हो उसी अक्षर के अनुसार निर्दोष नाम रखना चाहिए । बहुत से विद्वान् कन्या सङ्कल्प के समय 'वरस्य पंचमेकन्या, कन्यायाः नवमे वरः बोलते हुए नाम बदल लेते हैं । ऐसे नाम बदलना व्यर्थ है अतः पहिले सारणी से गुणदोष देखें । (पञ्चाङ्गतः)

दायभक्तमानीय (भाषाया द्वदभत्तऽ)

- पुनरग्निं परिसमूह्य पर्युक्ष्य परिषिच्य ९ चतुष्कोष्टैः परिस्तीर्यः

- (इस प्रसंग में वर-वधू दोनों को एक पात्र में दूध भात भक्षण कराया जाता है प्रायः ७/७ ग्रास वर-वधू भक्षण करते हैं) पुनः अग्नि का निम्नमन्त्रों से परिसमूहन पर्युक्षण और परिषिञ्चन से ९ बार जल से सिंचन कर तथा कुशाओं को ५/३/३/५ के क्रम से पूर्व, दक्षिण, पश्चिमोत्तर में बिछा-वन करें। यथा—

ऋतन्त्वा सत्येन 'अग्निं' परिसमूह्यामि, सत्यन्त्वर्तेन परिसमूह्यामि, ऋतसत्याभ्यां परिसमूह्यामि। ऋतन्त्वा सत्येन 'अग्निं' पर्युक्ष्यामि, सत्यन्त्वर्तेन पर्युक्ष्यामि, ऋतसत्याभ्यां पर्युक्ष्यामि। ऋतन्त्वा सत्येन 'अग्नि' परिषिञ्चामि, सत्यन्त्वर्तेन परिषिञ्चामि, ऋतसत्याभ्यां परिषिञ्चमि॥ आदौ पञ्च पुनस्त्रीणि त्रीणि पञ्च तथैव व पूर्वतः दक्षिणतः पश्चिमतः उत्तरतः॥

अन्न पात्रे इदं हविः ०

इदं हविः प्रजननं में अस्तु दशवीरं सर्व गणं स्वस्तये।
आत्मसनि, प्रजासनि, पशुसनि, लोकसन्यभिसनि
अग्निं प्रजां बहुलां मे करोत्वन्नं पयोरेतो अस्मासु धत्त॥ (पृष्ठ २६८)

- हस्तेनाहुतिद्वयंहुत्वा—यथा—

अग्नये स्वाहा। प्रजापतये स्वाहा॥

● अग्नि विमुच्यः यथा—

ऋतन्त्वा सत्येन 'अग्नि' विमुञ्चामि, सत्यन्त्वर्तेन विमुञ्चामि, ऋतसत्याभ्यां विमुञ्चामि ॥ नयामि ॥

धर्मं देहि०— निम्नमन्त्र से हाथ जोड़ प्रार्थना :

धर्मं देहि धनं देहि पुत्रपौत्रांश्च च देहि मे।
आयुरारोग्यमैश्वर्यं, देहि में हव्यवाहन् ॥१ ॥
भक्तिं देहि श्रियं देहि, सुखं देहि स्वतन्त्रताम्।
देहि भोगं च मोक्षं च, मनोभिलषितं मम ॥२ ॥
गच्छ गच्छ सुरश्रेष्ठ, ब्रह्म विष्णु महेश्वर।
यत्र देवालयाः सर्वे, तत्र गच्छ हुताशन ॥३ ॥
तेजोसि तेजो मयि देहीत्यात्मानं देहि ॥४ ॥

● **अन्नपात्रात्क्षेत्रेश बलिं दत्वा—शेषं व धूवरौ प्राश्नीतः ॥**

भाषा : अन्न पात्र से क्षेत्र पालों को बलि प्रदान कर अवशिष्ट अन्न को वर-वधू दोनों ही एक पात्र में अन्न भक्षण करें । इस स्थल पर 'समाशन' करने में शास्त्रकारों ने कोई दोष नहीं माना है । इस कर्म को वर-वधू के पारस्परिक प्रेम वृद्धि का हेतु दर्शाया है । वर निम्नमन्त्रों का उच्चारण कर समशन क्रिया सम्पन्न करें । यथा :(क) **क्षेत्रेशबलिम्— योऽस्मिन् निवसति क्षेत्रे, क्षेत्रपालः सकिंकरः । तस्मै निवेदयाम्यद्य, बलिं पानीय संयुतम् ॥ क्षां क्षेत्राधिपतयेऽन्नं नमः रां राष्ट्राधिपतयेऽन्नं नमः सर्वाभय वर प्रदो मयि पुष्टिं पुष्टिपतिर्दधातु ॥** (ख) वर-वधू थाली का स्पर्शकरते हुए मन्त्रोच्चारण करें :

अन्नमेव विवननमन्नं, संवननं स्मृतम्।
अन्नं पशूनां प्राणं सदऽन्नं, ज्येष्ठं भिषक्स्मृतम् ॥१ ॥
अन्नमयेन मणिना, प्राणसूत्रेण पृश्निना।
सिनोसि सत्यग्रन्थिना, हृदयं च मनश्च ते ॥२ ॥

सह वाचा मनो अस्तु, सहचित्तं सहव्रतम्।
चक्रमिवानुड्हः पदं, मामेवान्वेतु ते मनः ॥३ ॥

मां चैव पश्य सूर्यं च, मा चान्येषु मनः कृथाः ।
चाक्रवाकं संवननं, मम चामुष्याश्च भूयाद् ॥४ ॥

(वरेणवध्वा षष्ठ्यन्तं नाम ग्राह्यम्)

मन्त्रार्थ : अन्न ही विभाजन और समशन की वस्तु समझा जाता है । अन्न प्राणियों का प्राण है । अन्न ही तो प्रशस्त भेषज (औषध) कहलाता है अर्थात् अन्न ही क्षुधा जनित व्याधियों को हर लेता है ॥१ ॥ (वर, वधू से कहता है)— हे वधू तेरे हृदय और मन को मैं अन्नमय मणि तथा सूक्ष्म प्राण सूत्र से, सत्य की ग्रन्थि (गाँठ) द्वारा बान्धता हूँ ॥२ ॥ हे वधू ! हम दोनों का मन और वचन समान हो अर्थात् जैसा निर्व्याज वचन ही वैसा ही छल रहित यानि निष्कपटमन हो । हमारा चित्त सहभाव युक्त और हमारा व्रत भी समान हो, यथा छकड़े का चक्र अपने खींचने वाले बैल के पग अनुसरण करता है उसी प्रकार तेरा मन मेरा अनुसरण करे ॥३ ॥ हे वधू मुझको और सूर्य को देख, पर-पुरुष में मन मत लगा । जिस प्रकार चक्रवाक् पक्षियों का जोड़ा उपलब्ध (प्राप्त) वस्तु को अनुरागवश समविभाजन कर के खाता है उसी प्रकार हम दोनों की पारस्परिक प्रीति होवे और उत्तरोत्तर विकास को प्राप्त होवे ॥४ ॥ (चतुर्थ श्लोक में 'अमुष्य' के स्थान पर वर, वधू का नाम षष्ठी विभक्ति में ले ।

॥ मंगल पुष्प प्रक्षेपणम् ॥

यजमान और यजमान पत्नी क्रमशः वर-वधू के समीप खड़े होकर निम्न मङ्गलमय २७ छन्दोबद्ध मन्त्रों का पाठ करते हुए वर-वधू पर पुष्पों की अनवरत वर्षा करें। ६४ में से २७ सार युक्त श्लोकों का चयन उच्चारण सुविधा तथा समय के न्यूनतम व्यय को दृष्टि में रखकर किया गया है साथ ही पद विभाजन करके वाचक के लिए उच्चारण सुविधा का प्रयास किया गया है। इतिशम् ॥

ज्योत्कारं क्रमते चैव, स्वस्तिना परिपठ्यते।
ब्राह्मणै राशिषाः कार्या, विष्णुर्वचन मब्रवीत् ॥१॥
विष्णुर्वा त्रिपुरान्तको भवतु वा, ब्रह्मा सुरेन्द्रोथवा,
भानुर्वा शशि लक्ष्मणोथ भगवान्, बुधोथ सिद्धोथवा।
राग द्वेष विषार्ति मोह रहितः, सन्तान कल्पद्रुमो,
यः सर्वैः सह संस्कृतो गुण गणैः, तस्मै नमः सर्वदा ॥२॥
प्रसन्न मूर्तिः स्थिर मन्त्र विग्रहः, समग्रशक्ति जगदेक बान्धवः।
उमा पतिः खण्ड शशाङ्कशेखरो, जयत्यनाथार्तिहरो महेश्वरः ॥३॥
सुवर्चला यथार्कस्य, यथा चन्द्रस्य रोहिणी।
मदनस्य रतिर्यद्वत, तथा त्वं भव भर्तरि ॥४॥
रामस्य च यथा सीता, विनता कश्यपस्य च।
पावकस्य यथा स्वाहा, तथा त्वं भव भर्तरि ॥५॥
यथा गौरी महेशस्य यथा स्वर्ग पतेः शची।
यथा श्रीः श्रीधरस्यैव, तथा त्वं भव भर्तरि ॥६॥
यथेन्द्राणी हरिहये, स्वाहा चैव विभावसौ,
रोहिणी च यथा चन्द्रे, दमयन्ती यथा नले।

यथा वैश्रवणे भद्रा, वसिष्ठे वा प्यरुन्धती,
यथा नारायणे लक्ष्मीः, तथा त्वं भव भर्तरि ॥७॥

पृथिव्यां यानि रत्नानि, गुणवन्ति गुणानि च।
तान्याप्नुहित्वं कल्याणि, सुखिनी शरदः शतम् ॥८॥

धन पुत्रवती साध्वी, सततं भर्तृ वल्लभा।
मनोज्ञा ज्ञान सहिता, तिष्ठ त्वं शरदः शतम् ॥९॥

यद्वन् नृपे दशरथे च कुसल्य कन्या,
मन्दोदरी दशमुखेऽसुर संघ मुख्ये।
अत्रौ यथा सकल धर्म रताऽनुसूया,
तद्वद् भव त्वमपि भर्तरि नित्यरक्ता ॥१०॥

यन्मङ्गलं शैल सुता विवाहे, हरस्य दत्तं कमलासनेन।
तन्मङ्गलं तेऽद्य विवाह काले, ददामि वै देव मुनि प्रणीतम् ॥११॥
सूर्य सोम कुज चन्द्र-नन्दना, जीव शुक्रशनि राहु केतवः।
ध्रुव कुम्भजयुता महाग्रहाः, मङ्गलंदधतु वोऽभिषेकजम् ॥१२॥

सूर्येन्दु राशि तिथियोग मुनीन्द्र तारा,
लोकेश भूत वसुनाग नगाः समुद्राः।
विद्याधरा प्सरस आदि गणाः सदैव,
कुर्वन्तु वां सुमुदिताः प्रथमाभिषेकम् ॥१३॥

आदित्योग्नियुतो विधुः सवरुणो, भौमः कुमारान्वितः
सौम्यो विष्णुयुतो गुरु समघवा, वाणी युतो भार्गवः।
सब्रह्मा रविजो गणेश्वर युतो, राहुः सरुद्रः शिखी
माङ्गल्यं ददतो हरार्चन रताः, कुर्वन्तु वां मङ्गलम् ॥१४॥

यावद् द्वीपे तरङ्गान् वहति सुर नदी, जाह्नवी पुण्य तोया
यावदाकाशमार्गे तपति दिनकरो, भास्करो लोकपालः।

यावद् ब्रह्माचविष्णुः सुरपति सहितो, वर्तते मेरु शृङ्गे
तावत् त्वं भूमि निष्ठो धनसुत सहितो, भुङ्क्ष्व पथ्यां सुलक्ष्मीम् ॥१५॥
यावच्चन्द्रार्क तारा भ्रमयति गगने, काल मूर्तिश्च विष्णु-
यावत्कैलास मेरु हिमगिरि गिरिजा, यान्ति नद्यः समुद्रम्।
यावत्कल्पान्तकालं दनुज सुरगणा, भूर्भुव स्वश्च यावत्-
तावत्त्वं भूमि निष्ठो धन सुत सहितो, भुङ्क्ष्व पथ्यां सुलक्ष्मीम् ॥१६॥
लक्ष्मीः कौस्तुभ पारिजातक तरु, धन्वन्तरिश्चन्द्रमा
धेनुः कामदुधा सुरासुर गजो, रम्भा च देवाङ्गना।
अश्वः सप्तमुखस्तथा हरि धनुः, शंख, विषं चाऽमृतम्
रत्ना नीति चतुर्दश प्रतिदिनं, कुर्वन्तु वां मंगलम् ॥१७॥
यावत् तोयधरा धराधर धरा, धाराधरा भूधरा
यावच्चारु विचारु चारुचमरं, चामीकरं चामरम्।
यावद् राम विराम राम रमणं, रामायणं श्रेयसे
तावद् भोग विभोग भोग भवनं, भोगायनं त्वं भव ॥१८॥
आयुर्वर्षशतं शतं तप शतं, वराङ्गनानां शतं
कम्बोजाऽश्व शतं शतं शत गुणौ, मतङ्गजानां शतम्।
छत्रं पूर्ण घटाभिषेक सहितं, दासीजनानां शतं
जीवत्वं सकलत्र पुत्र सहितो, मन्वन्तराणां शतम् ॥१९॥
आयुष्मान् भव पुत्रवान् भव भव, श्रीमान् यशस्वी भव
प्रज्ञावान्भव भूरि भूति करणौ, दानैः कनिष्ठोभव।
तेजस्वीभव वैरि-दर्प-दलन, व्यापार दक्षो भव
श्री शम्भोर्भव पद-पूजन रतः, सर्वोपकारी भव ॥२०॥
आयुद्रोणसुते श्रियोदशरथे, शत्रुक्षयं राघवे

ऐश्वर्यं नहुषे गतिश्च पवने, मानं च दुर्योधने।
शौर्यं शान्त नवे बलं हल धरे, सत्यं कुन्ती सुते
विज्ञानं विदुरे भवन्तु भवतः, कीर्तिश्च नारायणे ॥२१ ॥

आयुर्बलं विपुलमऽस्तु सुखितमऽस्तु
सौभाग्यमऽस्तु निषदा तव कीर्तिरस्तु।
श्रीरस्तु धर्ममतिरस्तु रिपुक्षयोस्तु
सन्तानवृद्धि रभिवाञ्छित सिद्धिरस्तु ॥२२ ॥

दीर्घायुर्भव जीववत्सर शतं, नश्यन्तु सर्वापदः
स्वास्थ्यं सम्भज चंचलां त्यज मति, लक्ष्म्येकनाथो भव।
किं ब्रूमो भृगु-गौतमात्रि-कपिलो, व्यासादिभिर्भाषितं
यद्रामस्य पुराभिषेक समये, तच्चाऽस्तुते मंगलम् ॥२३ ॥

सुपुण्याहं सुनक्षत्रं, सुलग्नं च सुमङ्गलम्।
अस्मिन् विवाहकालेतु, देयाद् गणपतिस्तु वाम् ॥२४ ॥

आयुश्च विद्यां च धनं सुखं ते,
धर्मार्थ कामं बहुपुत्र लाभम्।
शत्रु क्षयं राजसुपूज्यतां च,
तुष्टा ग्रहाः सर्व कामान् दिश्यन्तु ॥२५ ॥

सुरार्चनेन दानेन, साधूनां सङ्गमेन च।
आशीर्वादेन विप्राणां, जीव त्वं शरदः शतम् ॥२६ ॥

मार्कण्डेय मुनः स्वर्ग, वैद्ययोः स्वर्पतेः समम्।
आयु रारोग्य मैश्वर्य, मेतत् त्रितय मस्तु ते ॥
जीव त्वं शरदः शतम् ॥२७ ॥

॥इति मंङ्गल पुष्प प्रक्षेपणम् ॥

शान्तिः !

शान्तिः ! !

शान्तिः ! ! !

॥सुशान्तिर्भवतु ॥

॥अथाग्निं कृत्यम् ॥

- मंगल पुष्प प्रेक्षपण पश्चात् विवाह की अन्तिम कड़ी पर हाथ में कुशस्तर और यव तिलादि के दाने लेकर निम्नविधि से किये गये कार्य में न्यूनाधिकता की सम्पूर्णतार्थ, आचार्य उक्त कृत्य सम्पन्न कराये । यथा—

ओ३म् गायत्र्यै नमः । ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धी महि धियो यो नः प्रचोदयात् ॥३ बार ॥

ओ३म् तत्सदद्य तावत् मासोत्तमे महामाङ्गल्यप्रदेऽमुकमासेऽमुकपक्षेऽमुक तिथौऽमुकवासरान्वितायां महागणपतेः, कुमारस्य, श्रियः, सरस्वत्याः, लक्ष्म्याः, विश्वकर्मणः द्वारदेवतानाम् । अग्नेः पुष्टिपतेः, प्रजापतेः, अर्यम्णः, गन्धर्वस्य, त्र्यम्बकस्य विवाहोद्वाह देवतानाम् । अग्नेः, वायोः, सूर्यस्य, चन्द्रमसः, विष्णोः प्रायश्चित्तयागदेवतानाम् । मेषादीनां द्वादश राशि नाम् । अश्विन्यादिनां सप्तविंशति नक्षत्राणाम् । वासुदेवस्य, (सङ्कर्षणस्य, प्रद्युम्नस्य, अनिरुद्धस्य, सत्यस्य, पुरुषस्य, अच्युतस्य, माधवस्य गोविन्दस्य) सहस्रनाम्नः विष्णोः, लक्ष्मीसहितस्य नारायणस्य । भवस्यदेवस्य (शर्वस्यदेवस्य, रुद्रस्यदेवस्य, पशुपतेर्देवस्य, उग्रस्यदेवस्य, ईशानस्यदेवस्य) पार्वती सहितस्य परमेश्वरस्य । विनायकस्य (कृष्ण पिङ्गलस्य, गजाननस्य, लम्बोदरस्य, भाल चन्द्रस्य, हेरम्बस्य, आखुरथस्य, विघ्नेशस्य, विघ्नभक्ष्यस्य) वल्लभा सहितस्य महागणेशस्य । ह्रां ह्रीं सः सूयस्य (सप्ताश्वस्य, अनश्वस्य, एकाश्वस्य, नीलाश्वस्य, प्रत्यक्षदेवस्य, परमार्थ सारस्य, तेजो रूपस्य) प्रभा सहितस्य आदित्यस्य । भगवत्याः अमायाः कामायाः, चार्वङ्ग्याः, टङ्कधारिण्याः, तारायाः, पार्वत्याः, यक्षिण्याः, श्रीशारिका भगवत्याः, श्रीशारदा भगवत्याः, श्री महाराज्ञी भगवत्याः, श्री ज्वालाभगवत्याः, ब्रीडा भगवत्याः, वैखरी भगवत्याः, वितस्ता भगवत्याः, गङ्गा भगवत्याः, यमुना भगवत्याः, कालिका भगवत्याः, सिद्धलक्ष्म्याः, महालक्ष्म्याः, महात्रिपुर सुन्दर्याः, सहस्रनाम्न्याः देव्याः । विष्णु पञ्चायतन देवतानाम् । इन्द्रादिनां दशदिक्पालानाम् । अनन्तादीनाम् अष्टानां कुलनाग देवतानाम् । अग्न्यादित्योः, वरुण-चन्द्रमसोः, कुमारभौमयोः, विष्णु बुधयोः, इन्द्र बृहस्पत्योः, सरस्वती शुक्रयोः, प्रजापति शनैश्चरयोः, गणपति राहोः, रुद्रकेत्वोः, ब्रह्म ध्रुवयोः, अनन्तागस्त्योः । ब्रह्मणः, कूर्मस्य, ध्रुवस्य, अनन्तस्य, हरेः, लक्ष्म्याः, कलमायाः । शिख्यादिनां पञ्चचत्वारिंशद् वास्तोष्पतिदेवतानाम् । ॐ भूर्देवतानां, ॐ भुवोर्देवतानां, ॐ स्वर्देवतानां, ॐ भूर्भुवः स्वर्देतानाम् । अखण्ड ब्रह्माण्ड देवतानाम्, धुरां, उपधुरां, महागायत्र्याः, महासावित्र्याः, महासरस्वत्याः, हेरुकादिनां, वटुकादिनाम्

आत्मनो वाङ्मनाकायोपार्जित पाप निवार्णार्थं **(वर कहे)** आत्मोद्वाह निमित्तं **(यजमान कहे)** कन्योद्वाह निमितम् **(दोनों कहें)** — कलश पूजनं, ग्रह मण्डल पूजनं, दिक्पाल पूजनमऽच्छिद्रं सम्पूणमऽस्तु। **आचार्य कहे—** एवमऽस्तु ॥

- **हाथ में रखे हुए दर्भकाण्ड यवतिलादि इधर-उधर फैंकें ॥**

- **उपर्युक्त कृत्य के पश्चात् वर-यजमान हाथ जोड़कर निम्नवाक्य उच्चारण करते हुए अपनी अल्पज्ञता तथा विश्वम्भर भगवान् की सर्वज्ञता का भाव रखकर अन्त में साष्टाङ्ग (दण्डवत्) प्रणाम करें—**

॥कृताञ्जली नमस्कारम् ॥

आपन्नोस्मि शरण्योऽसि, सर्वाऽवस्थासु सर्वदा।
भगवाँस्त्वां प्रपन्नोऽस्मि, रक्ष मां शरणागतम् ॥१ ॥

आवाहनं न जानामि, न जानामि विसर्जनम्।
पूजाभावं न जानमि, क्षम्यतां परमेश्वर !
क्षम्यताम् परमेश्वरि ! ॥२ ॥

॥साष्टाङ्ग प्रणामम् ॥

पद्भ्यां, कराभ्यां, जानुभ्यां, शिरसा, उरुसा,
मनसा, वचसा, कर्मणा च साष्टाङ्ग
नमस्कारं
करोमि नमः ॥

* * *

॥अथोदकलशम्॥

- इसके पश्चात् यजमान् आचार्य के पृष्ठभाग से (पीछे की ओर से) आगे बढ़कर कलश पात्र उठा कर दक्षिण परिक्रमा से पुनः आचार्य के पास आकर कलश-पात्र समर्पण करे फिर आचार्य और अन्य उपस्थित बन्धु खड़े होकर निम्न वेदोक्त स्वस्वि वाचन से अन्तिम क्रिया का सम्पादन कर विवाहोद्वाह क्रिया का समापन करें : यथा— (अभिषेचन करें)

उतिष्ठ ब्रह्मणस्पते ! देवयन्तस्त्वेमहि उपयन्तु मारुतः,

सदानव इन्द्र प्रशूनभवा सत्ता, अर्यमा यातु वृषभस्तु विष्मान्यन्ता वसूनि विधत्ते तनूपाः सहस्राक्षो गोत्रमिद वज्रबाहुः, अस्मासु देवो द्रविणं दधातु, य ते अर्यमन बहुवो दैवयानाः पन्थानो राजन् ! दिव आचरन्ति, तेभिर्नो पथिभिः सुगेभि रक्षा च नो अधि च ब्रूहि देव ! ॥

बोधश्च मा प्रतिबोधश्च पुरस्ताद् गोपायतामऽस्वप्नश्च मानवद्राणश्च दक्षिण तो गोपायतां, गोपायमानश्च मा रक्षमाणश्च पश्चाद् गोपायतां, जागृविश्च माऽरुन्धती चोत्तराद् गोपायतां, अन्नमिन्नो अधरागऽमिन्नमुदङकृधि, इन्द्रानमिन्नन्न पश्चाद्ऽनमिन्नं पुरस्कृधि, अनमित्रैरहोभिः सचेमहि विश्वेदेवा अन्निमत्रा न उषसः सन्तु निम्रुचा, यः षडूर्वीः पञ्च प्रदिशास्तानः पान्तुमित्र धानी मित्रे दधाता अभयं नोऽअस्तु, ये रात्रीमऽनुतिष्ठथ ये च भूतेषु जागृथ पशून्ये सर्वान् रक्षत जागृतेऽरुन्धतीति, ये देवास्तनूपाः स्थ ते म इह तन्वं पात बोध प्रतिबोधेत्यसौ, वा आदित्यो बोधोऽग्निः, प्रतिबोधो स्वप्नावद्राणेत्यहवैं गोपायमानो रात्री रक्षमाणो जागृव्य रुन्धतीति यज्ञो वै जागृविर्दक्षिणा रुन्धत्येते वै देवा राष्ट्रभृतास्ताने वेष्टं आत्मने गोपीथायन ॥

॥इत्युद कलशम्॥

उपर्युक्त वेदोक्त स्वस्ति वाचन तथा अभिषेचन के पश्चात् आचार्य निम्न अनुष्टुप् छन्द युग्म का उच्चारण करते हुए कलश पात्रस्थ— अक्षोट वा बादाम उपस्थित बन्धुओं में वितरण करें—

मन्त्रार्थाः सफलाः सन्तु, पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोऽस्तु, मित्राणामुदयस्त्व ॥१ ॥

मार्कण्डेयमुनेः स्वर्ग, वैद्ययोः स्वर्पते समम् ।
आयुरारोग्यमैश्वर्य मे तत्रितयमस्तुते ॥

जीव त्वं शरदः शतम् ॥२ ॥

विक्रमाब्दे २०५२ ज्यैष्ठ शुक्ल पौर्णमायां भौमवासरे
समाप्तश्चेदं परोपकारार्थमायासम्
'विवाहविधीत्याख्यम्' ॥

ओ३म् शान्तिः ! शान्तिः ! ! शान्तिः ! ! !
॥सुशान्तिर्भवतु ॥

॥आदिदेववन्दनम् ॥

कालातीतं कलातीतं, गुणातीतं गजाननम्।
आदिदेवं महादेवं, देवदेवं वराननम् ॥१ ॥
एकदन्तं दयावन्तं, गौरी पुत्रं सुरेश्वरम्।
वन्देऽहं शैलजा सूनुमादिदेवं गणेश्वरम् ॥२ ॥
मायातीतं दयाशीलं, कृपाशीलं सुखाननम्।
सिद्धिदं जनवृद्धिदं, श्रीकरमऽमलाननम् ॥३ ॥
वक्रतुण्डं महाकायं, कोटि सूर्य प्रभाकरम्।
वन्देहं शैलजा सूनु, मादिदेवं गणेश्वरम् ॥४ ॥
कोटिसूर्य समाकारं, कोटिचन्द्र सम प्रभम्।
दीनानाथं दयागारं, हरिहराऽज संस्तुतम् ॥५ ॥
धूम्र वर्णं गुणागारं, इष्टदमऽमरेश्वरम्।
वन्देऽहं शैलाज सूनु, मादिदेवं गणेश्वरम् ॥६ ॥
मूषकस्थं गणाध्यक्षं, भाल चन्द्रं सुरार्चितम्।
आशुतोषं महाप्राज्ञं, देवदानव पूजितम् ॥७ ॥
लम्बोदरं विशालाक्षिं, स्मितास्यमऽजरेश्वरम्।
वन्देऽहं शैलजासूनु, मादिदेवं गणेश्वरम् ॥८ ॥

गणपतिं गणाधीशं, सन्नुतं शिव सौख्यदम्।
मोक्षदं दुरितापहं, चिद्धनं सुख भोगदम् ॥९ ॥

श्रीधरं कृष्ण पिङ्गाक्षं, आद्यन्तमखिलेश्वरम्।
वन्देऽहं शैलजासूनु, मादिदेवं गणेश्वरम् ॥१० ॥

आदिवन्द्यं जगद्वन्द्यं, यक्ष गन्धर्वभिर्नुतम्।
प्रपन्नार्तिहरन्दक्षं, भोग स्वर्गापवर्गदम् ॥११ ॥

ज्ञानानन्दं सदानन्दं, ब्रह्मानन्दं विनायकम्।
वन्देऽहं शैल जासूनु, मादिदेवं गणेश्वरम् ॥१२ ॥

शिवशक्ति प्रियन्देवं, भुक्ति मुक्ति प्रदायकम्।
धर्मार्थ काम मोक्षदं, ज्ञानविज्ञान दायकम् ॥१३ ॥

सदानन्दकरन्देवं, तेजोदं करुणाकरम्।
वन्देऽहं शैलजासूनु, मादिदेवं गणेश्वरम् ॥१४ ॥

चिद्घनं मणिमालिनं, कालजाल विनाशकम्।
सेवने भक्ति भावेन, यथेष्ट फलदायकम् ॥१५ ॥

सौम्यरूपं चिदानन्दं, गज वक्त्रं त्रिलोचनम्।
वन्देऽहं शैलजासूनु, मादिदेवं गणेश्वरम् ॥१६ ॥

शोडशैतानि श्लोकानि, गणेशस्य महात्मना।
रचितं शक्तिदासेन, प्राणिनां हितकारकम् ॥१७ ॥

ये पठन्ति सदा मर्त्याः, शुचिर्भूत्वा जितेन्द्रियाः।
लभन्ते परमानन्दं, सत्यं सत्यं न संशयः ॥१८ ॥

॥शिवशक्तिचरण कमलानुरागीः दुर्गा लाल शर्मा राजपुरोहित ॥

* * *

॥अथान्ते इष्टदेव्याराधनम् ॥

॥सर्वश्री अष्टादशभुजाष्टकम् ॥

ओ३म् ऐङ्ग् ह्रीङ्क्लीञ्चामुण्डायै विच्चे ॥१०८ ॥

सिद्धपीठे गिरौ रम्ये, तुङ्ग शैल निवासिनि !
विश्वेश्वरि जगद्धात्रि, महिषासुर घातिनि ॥
बुद्धिदे जनवृद्धिदे, भक्तानुग्रहकारिणि !
माहेश्वरि नमस्तुभ्यं, भक्तानामुपकारिणि ॥१ ॥

त्र्यम्बके करुणाकरे, शोणितासुर मर्दिनि !
आद्य शक्ति महाशक्ति, चण्डमुण्ड विनाशिनि ॥
जटाजूट समायुक्ते, पुत्रदा वर धारिणि !
माहेश्वरि नमस्तुभ्यं, भक्तनामुपकारिणि ॥२ ॥

ब्रह्मेन्द्ररुद्रसंस्तुते, दैत्यदर्प विमर्दिनि !
सज्जनानां सुशीलानां, भुक्तिमुक्ति प्रदायिनि ॥
क्षीरोदधिसमुद्भुते, भवसागर तारिणि !
माहेश्वरि नमस्तुभ्यं, भक्तानामुपकारिणि ॥३ ॥

महामाया स्वरूपेच, मधुकैटभ मोहिनि !
शिवदूति करालि च, निशुम्भ शुम्भ घातिनि ॥
पुत्रदे बुद्धिदे नित्ये, सच्चिदानन्द कारिणि !

माहेश्वरि नमस्तुभ्यं, भक्तानामुपकारिणि ॥४ ॥

अकारे च इकारे च, उकारैङ्कार रूपिणि !
ह्रीङ्कारि शक्ति रूपेच, क्लीङ्काराम्बर वासिनि ॥

त्रिनेत्रेच त्रिरूपेच, त्रैलोक्यत्राणकारिणि !
माहेश्वरि नमस्तुभ्यं, भक्तानामुपकारिणि ॥५ ॥

सुलोचने रक्ताक्षि च, धूम्रलोचन घातिनि !
अजे च बहुवर्णे च, शताक्षि च शाकम्भरि ॥

जगत्कर्त्रि जगत्भर्त्रि, जगत्संहार कारिणि !
माहेश्वरि नमस्तुभ्यं, भक्तानामुपकारिणि ॥६ ॥

भीमादेवि भ्रामरिच, विन्ध्याचल निवासिनि !
रक्तदन्तिके दुर्गे च, दुष्टम्लेच्छ विनाशिनि ॥

विजये च जयन्त्ये च, परमानन्द कारिणि !
माहेश्वरि नमस्तुभ्यं, भक्तानामुपकारिणि ॥७ ॥

भीमाक्षि भीम रूपे च, दुष्टदानव घातिनि !
मङ्गले च सुशीले च, सदाऽमङ्गल नाशिनि ॥

श्रीस्थलदेवि चामुण्डे, ममानुग्रहकारिणि !
माहेश्वरि नमस्तुभ्यं, भक्तानामुपकरिणि ॥८ ॥

चण्डिकायाष्टकं त्विदं, गृहे किं वा सुरालये
यः पठेत् प्रयतः नित्यं, भक्तिभाव समन्वितः ॥

स श्रीमान्गुणवान्धीमान्, बन्धुदार सुतैर्युतः
भविष्यति निरातङ्को, महामाया प्रसादतः ॥९ ॥

सरसिजनयने ! चन्द्रार्कवदने ! दयाद्र चित्ते ! भगवति जगदम्बे ! अष्टादशभुजे ! प्रसीद दयांकुरु ॥

श्री जगदम्बा चरणकमलानुरागी— दुर्गालाल शर्मा राजपुरोहित मट्टू ।

॥ इत्यलम् ॥

परिशिष्ट

आपन्नकालीन व्यवस्था

"तीन घंटे में विवाह"

वैसे तो विवाह संस्कार के इस पवित्र कृत्य को पूर्ण करने में छः घंटे अपेक्षित हैं किन्तु आपन्नकालीन परिस्थिति में तीन घंटे में उक्त क्रिया को पूर्णतः प्रदान करने के लिए निम्न प्रकरण का स्पर्श अनिवार्य रूप से किया जावे :

(१) ग्रहमण्डलनिर्माणम् ।
(२) ग्रहस्थापनम् ।
(३) स्वस्त्ययनम् ।
(४) आनोभद्रम् ।
(५) कलशार्चनम् ।
(६) द्वारदेवता पूजनम् ।
(७) रक्षोघ्न मन्त्रों में अन्तिम ७ मन्त्र ।
(८) पृच्छोपरान्त देवताओं का आवाहन, पाद्यार्घ्य ।
(९) अभिषेक में आद्यखण्ड के अन्तिम दो मन्त्र ।
(१०) कन्याभिषेक में पृष्ठ ९७ पर के प्रथम दो मन्त्र ।
(११) वर-वधू तिलकं मार्जनम् ।
(१२) पाणिग्रहणं पृष्ठ संख्या १०६ तः १२१ ।
(१३) अग्नि कर्म— १३० तः १३१/१३३ तः १३४/१३६ तः १३७/ का स्वाहाकार
(१४) लाजा होम ।
(१५) सप्तपदी ।
(१६) दायभक्त क्रिया ।
(१७) मंगल पुष्पाणि प्रथम १० श्लोक ।
(१८) उदकलशम् ।

— लेखक